# सौन्दरनन्दम्

Exported from ambuda.org on 2025-12-23 06:47:56 UTC

1.head

प्रथमः सर्गः

1.1

ॐ नमो बुद्धाय ॥

1.2

गौतमः कपिलो नाम मुनि धर्मभृतां वरः ।बभूव तपसि श्रान्तः काक्षीवान् इव गौतमः ॥ १ ॥

1.3

अशिश्रियद् यः सततं दीप्तं काश्यपवत् तपः ।आशिश्राय च तद्वृद्धौ सिद्धिम् काश्यपवत् पराम् ॥ २ ॥

1.4

हविःषु यश् च स्वात्मार्थं गाम् अधुक्षद् वसिष्ठवत् ।तपःशिष्टेषु च शिष्येषु गाम् अधुक्षद् वसिष्ठवत् ॥ ३ ॥

1.5

माहात्म्याद् दीर्घतपसो यो द्वितीय इवाभवत् ।तृतीय इव यश् चाभूत् कायाङ्गिरसयोर् धिया ॥ ४ ॥

1.6

तस्य विस्तीर्णतपसः पार्श्वे हिमवतः शुभे ।क्षेत्रं चायतनं चैव तपसाम् आश्रमोऽभवत् ॥ ५ ॥

1.7

चारुवीरुत्तरुवनः प्रस्निग्धमृदुशाद्वलः ।हविर्धूमवितानेन यः सदाभ्र इवाबभौ ॥ ६ ॥

1.8

मृदुभिः सैकतैः स्निग्धैः केसरातरपाण्डुभिः ।भूमिभागैर् असंकीर्णैः साङ्गराग इवाभवत् ॥ ७ ॥

1.9

शुचिभिस् तीर्थसंख्यातैः पावनैर् भावनैर् अपि ।बन्धुमान् इव यस् तस्थौ सरोभिः ससरओरुहैः ॥ ८ ॥

1.10

पर्याप्तफलपुष्पाभिः सर्वतो वनराजिभिः ।शुशुभे ववृधे चैव नरः साधनवान् इव ॥ ९ ॥

1.11

नीवारफलसंतुष्टैः स्वस्थैः शान्तैर् अनुत्सुकैः ।अकीर्णोऽपि तपोभृधिभिः शून्यशून्य इवाभवत् ॥ १० ॥

1.12

अग्नीनां हूयमानानां शिखिना कूजताम् अपि ।तीर्थानां चाभिषेकेषु शुश्रुवे यत्र निस्वनः ॥ ११ ॥

1.13

विरेजुर् हरिणा यत्र सुप्ता मेध्यासु वेदिषु ।सलाजैर् माधवीपुष्पैर् उपहाराः कृता इव ॥ १२ ॥

1.14

अपि क्षुद्रमृगा यत्र सान्ताश् चेरुः समं मृगैः ।शरव्येभ्यस् तपस्विभ्यो विनयङ् शिक्षिता इव ॥ १३ ॥

1.15

संदिग्धेऽप्य् अपुनर्भावे विदुध्हेष्व् आगमेष्व् अपि ।प्रत्यक्षिण इवाकुर्वंस् तपो यत्र तपोधनाः ॥ १४ ॥

1.16

यत्र स्म मीयते ब्रह्म कैश् चित् कैश् चिन् न मीयते ।काले निमीयते सोमो न चाकाले प्रमीयते ॥ १५ ॥

1.17

निरपेक्षाः शरिरेषु धर्मे यत्र स्वभुद्धयः ।संहृष्टा इव यत्नेन तापसास् ते पिरे तपः ॥

1.18

श्राम्यन्तो मुनयो यत्र स्वर्गायोद्युक्तचेतसः ।तपोरागेण धर्मस्य विलोपम् इव चक्रिरे ॥ १७ ॥

1.19

अथ तेजविसदनं तपःक्षेत्रं तम् आश्रमम् ।केचिद् इक्ष्वाकवो जग्मू राजपुत्रा विवत्सवः ॥ १८ ॥

1.20

सुवर्णस्तम्भवर्ष्माणः सिंहोरस्का महाभुजाः ।पात्रं शब्दस्य महतः श्रियां च विनयस्य च ॥ १९ ॥

1.21

अर्हरूपा ह्य् अनर्हस्य महात्मानश् चलात्मनः ।प्राज्ञाः प्रज्ञाविमुक्तस्य भ्रातृयस्य यवीयसः ॥ २० ॥

1.22

मातृशुल्काद् उपगतां ते श्रियं न विषेहिरे ।ररक्षुश् च पितुः कौत्सास् ते भवन्ति स्म गौतमाः ॥ २२ ॥

1.23

एकपित्रोर् यथा भ्रात्रोः पृथग्गुरुपरिग्रहात् ।राम एवाभवद् गार्ग्यो वासुभद्रोऽपि गौतमः ॥ २३ ॥

1.24

शाक्रवृक्षप्रतिच्छन्नं वासं यस्माच् च चक्रिरे ।तस्माद् इक्ष्वाकुवंश्यास् ते भुवि शाक्य इति स्मृताः ॥ २४ ॥

1.25

स तेषां गौतमश् चक्रे स्ववंशसदृशीः क्रियाः ।मुनिर् ऊर्ध्वं कुमारस्य सगरस्येव भार्गवः ॥ २५ ॥

1.26

कण्वः शाकुन्तलस्येव भरतस्य तरस्विअः ।वाल्मीकिर् इव धीमांश् च धीमतोर् मैथिलेययोः ॥ २६ ॥

1.27

तद्वनं मुनिना तेन तैश् च क्षत्रियपुङ्गवैः ।शान्तां गुप्तां च युगपद् ब्रह्मक्षत्रश्रियं दधे ॥ २७ ॥

1.28

अथोदकलशं गृह्य तेषा वृद्धिचिकीर्षया ।मुनिः स वियद् उत्पत्य तान् उवाच नृपात्मजान् ॥ २८ ॥

1.29

या पतेत् कलशाद् अस्माद् अक्षय्यसलिलान् महीम् ।धारा ताम् अनतिक्रम्य माम् अन्वेत यथाक्रमम् ॥ २९ ॥

1.30

ततः परमम् इत्य् उक्त्वा शिरोभिः प्रणिपत्य च ।रथान् आरुरुहुः सर्वे शीघ्रवाहान् अलङ्कृतान् ॥ ३० ॥

1.31

ततः स तैर् अनुगतः स्यन्दनस्थैर् नभोगतः ।तदाश्रममहीप्रान्तं परिचिक्षेप वारिणा ॥ ३१ ॥

1.32

अष्टापदम् इवालिख्य निमित्तैः सुभींकृतम् ।तान् उवाच मुनिः स्थित्वा भूमिपालसुतान् इदम् ॥ ३२ ॥

1.33

अस्मिन् धारापरिक्षिप्ते नेमिचिह्नितलक्षणे ।निर्मिमीध्वं पुरं यूयं मयि याते त्रिविष्टपम् ॥ ३३ ॥

1.34

ततः कदाचित् ते वीरास् तस्मिन् प्रतिगते मुनौ ।बभ्रमुर् यौवनोद्दामा गजा इव निरङ्कुशाः ॥ ३४ ॥

1.35

बद्धगोधाङ्गुलीत्राणा हस्तविष्ठितकार्मुकाः ।शराध्मातमहातूणा व्यायताबद्धवाससः ॥ ३५ ॥

1.36

जिज्ञासमाना नागेषु कौशलं श्वापदेषु च ।अनुचक्रुर् वनस्थस्य दौष्मन्तेर् देवक्रमणः ॥ ३६ ॥

1.37

तान् दृष्ट्वा प्रकृतिं यातान् वृद्धान् व्याघ्रशिशून् इव ।तापसास् तद्वनर्ह् हित्वा हिमवन्तर्ह् सिषेविरे ॥ ३७ ॥

1.38

ततस् तदाश्रमस्थानं शून्यर्ह् तैः शून्यचेतसः ।पश्यन्तो तदाश्रमस्थानर् शून्यं तैः निशश्वसुः ॥ ३८ ॥

1.39

अथ ते पुण्यकर्माणः प्रत्युपस्थिरवृद्धयः ।तत्र तज्ज्ञैर् उपाख्यातान् अवापुर् महतो निधीन् ॥ ३९ ॥

1.40

अलं धर्मार्थकामानां निखिलानाम् स्वाप्तये ।निधयो नैकविधयो भूरयस् ते गतारयः ॥ ४० ॥

1.41

ततस् तत्प्रतिलम्भाच् च परिणामाच् च कर्मणः ।तस्मिन् वास्तुनि वास्तुज्ञाः पुरं श्रीमन् न्यवेशयन् ॥ ४१ ॥

1.42

सरिद्विस्तीर्णपरिखं स्पष्टाञ्चितमहापथम् ।शैलकल्पमहावप्रं गिविरजम् इवापरम् ॥ ४२ ॥

1.43

पाण्डुराट्टालसुमुखं सुविभक्तान्तरापणम् ।हर्म्यमालापरिक्षिप्तं कुक्षिं हिमगिरेर् इव ॥ ४३ ॥

1.44

वेदवेदाङ्गविदुषस् तस्थुषः षट्सु कर्मसु ।शान्तये वृद्धये चैव यत्र विप्रान् अजीत्जपन् ॥ ४४ ॥

1.45

तद्भूमेर् अभियोक्तृणां प्रयुक्तान् विनिवृत्तये ।यत्र स्वेन प्रभावेन भृत्यदण्डान् अजीत्जपन् ॥ ४५ ॥

1.46

चारित्रधन्संपन्नान् सलज्जान् दीर्घदर्शिनः ।अर्हतोऽतिष्ठिपन् यत्र शूरान् दक्षान् कुटुम्बिनः ॥ ४६ ॥

1.47

व्यस्तैस् तैस् तैर् गुञैर् युक्तान् मतिवाग्विक्रमादिभिः ।कर्मसु पतिरूपेषु सैचांस् तान् न्ययूयुजन् ॥ ४७ ॥

1.48

वसुमद्भिर् अविभ्रान्तैर् अलंविद्यैर् अविस्मितैः ।यद् बभासे नरैः कीर्णं मन्दरः किन्नरैर् इव ॥ ४८ ॥

1.49

यत्र ते हृष्टमनसः पौरप्रीतिच्कीर्षया ।श्रीमन्त्य् उद्यानसंज्ञानि यशोधामान्य् अचीकरन् ॥ ४९ ॥

1.50

श्वाः पुष्करिणीश् चैव परमाग्र्यगुणाम्भसः ।नाज्ञाया चेतनोत्कर्षाद् दिक्षु सर्वास्व् अचीखनन् ॥ ५० ॥

1.51

मनोज्ञाः श्रीमतिः प्रश्ठीः पथिषूपवनेषु च ।सभाः कूपवतीश् चैव समन्तात् प्रत्यतिष्ठिपन् ॥ ५१ ॥

1.52

हस्त्यश्वरथसकीर्णम् असंकीर्णम् अनाकुलम् ।अनिगूढार्थिविभवं निगूढज्ञानपौरुषम् ॥ ५२ ॥

1.53

संनिधानम् इवार्थानाम् आधानम् इव तेजसाम् ।निकेतम् इव विद्यानां संकेतम् इव संपदाम् ॥ ५३ ॥

1.54

वासवृक्षं गुणवताम् आश्रयं शरणैषिआम् ।आनर्तं कृतशास्त्राणाम् आलानं बाभुशालिनाम् ॥ ५४ ॥

1.55

समाजैर् उत्सवैर् दायैः क्रियाविधिभिर् एव च ।अलञ्चक्रुर् अलंवीर्यास् ते जगद्धाम तत्पुरम् ॥ ५५ ॥

1.56

यस्माद् अन्यायतस् ते च कं चिन् नाचीकरन् करम् ।तस्माद् अल्पेन कालेन तत् तदापूपुरन् पुरम् ॥ ५६ ॥

1.57

कपिलस्य च तस्यर्षेस् तस्मिन्न् आश्रमवास्तुनि ।यस्मात् ते तत्पुरं चक्रुस् तस्मात् कपिलवास्तु तत् ॥ ५७ ॥

1.58

ककन्दस्य मकन्दस्य कुशाम्बस्येव चाश्रमे ।पुर्यो यथा हि श्रूयन्ते तथैव कपिलस्य तत् ॥ ५८ ॥

1.59

आपुः पुरं तत्पुरुहूतकल्पास् ते तेजसार्येण न विस्मयेन ।आपुर् यशोगन्धम् अतश् च शश्वत् सुता ययातेर् इव कीर्तिमन्तः ॥ ५९ ॥

1.60

तन्नाथवृत्तैर् अपि राजपुत्रैर् अराजकं नैव रराज राष्ट्रम् ।तारासहस्रैर् अपि दीप्यमानैर् अनुत्थिते चन्द्र इवान्तरीक्षम् ॥ ६० ॥

1.61

यो ज्यायान् अथ वयसा गुणैश् च तेषां भ्रातृणां वृषभ इवौजसा वृषाणाम् ।ते तत्र प्रियगुरुवस् तम् अभ्यषिञ्चन्न् आदित्या दशशतलोचनं दिवीव ॥ ६१ ॥

1.62

आचारवान् विनयवान् नयवान् क्रियावान् धर्माय नेन्द्रियदुखाय धृतातपरः ।तद्भ्रातृभिः परिवृतः स जुगोप राष्ट्रं संक्रन्दनो दिवम् इवानुप्रतो मरुद्भिः ॥ ६२ ॥

1.63

सौन्दरनद महाकाव्ये कपिलवास्तुवर्णनो नाम प्रथमः सर्गः ।

2.head

द्वितीयः सर्गः

2.1

ततः कदा चित् कालेन तद् अवाप कुलक्रमात् ।राज शुद्धोधनो नाम शुद्धकर्मा जितेन्द्रियः ॥ १ ॥

2.2

यः ससञ्जे न कामेषु श्रीपाप्तौ न विसिस्मिये ।नावमेने परानृद्ध्या परेभ्यो नापि विव्यथे ॥ २ ॥

2.3

बलीयान् सत्त्वसंपन्नः श्रुतवान् बुद्धिमान् अपि ।विक्रान्तो नय्वांश् चैव धीरः सुमुख एव च ॥ ३ ॥

2.4

वपुष्मांश् च न च स्तब्धो दक्षिणो न च नारजवः ।तेजस्वी न च न क्षान्तः कर्ता च न च विस्मितः ॥ ४ ॥

2.5

आक्षिप्तः शत्रुभिः संख्ये सुहृद्भिश् च व्यपाश्रितः ।अभवद् यो न विमुखस् तेजसा दित्सयैव च ॥ ५ ॥

2.6

यः पूर्वैं राजभिर् यातां यियासुर् धर्मपद्धतिम् ।राज्यं दीक्षाम् इव वहन् वृत्तेतान्वगमत् पितॄन् ॥ ६ ॥

2.7

यस्य सुव्यहाराच् च रक्षनाच् च सुखं प्रजाः ।शिश्यिरे विगतोद्वेगाः पितुर् अङ्कगता इव ॥ ७ ॥

2.8

कृतशास्त्रः कृतास्त्रो वा जातो वा विपुले कुले ।अकृतार्थो न ददृशे यस्य दर्शनमेयिवान् ॥ ८ ॥

2.9

हितं विप्रियम् अप्य् उक्तो यः शुश्राव न चुक्षुभे ।दुष्कृतं बह्व् अपि त्यक्त्वा सस्मार कृतम् अण्व् अपि ॥ ९ ॥

2.10

प्रणतान् अनुजग्राह विजग्राह कुलद्विषः ।आपन्नान् परिजग्राह निजग्राहास्थितान् पथि ॥ १० ॥

2.11

प्रायेण विषये यस्य तच्छीलम् अनुवर्तिनः ।अर्जयन्तो ददृशिरे धनानीव गुणान् अपि ॥ ११ ॥

2.12

अध्यैष्ट यः परं ब्रह्म न व्यैष्ट सततं धृतेः ।दानान् यदित पात्रेभ्यः पापं नाकृत किं चन ॥ १२ ॥

2.13

धृत्यावाक्षीत् प्रतिज्ञां स सद्वाजिवोद्यतां धुरम् ।न ह्य् अवान्छीच् एयुतः सत्यान् मुहूर्तम् अपि जीवितम् ॥ १३ ॥

2.14

विदुषः पर्युपासिष्ट व्यकाशिष्टात्मवत्तया ।व्यरोचिष्त च शिष्टेभ्यो मासीषे चन्द्रमा इव ॥ १४ ॥

2.15

अवेदीद् बुद्धिशास्त्राभ्याम् इह चामुत्र च क्षमम् ।अरक्षीद् धैर्यवीर्याभ्याम् इन्द्रियाण्य् अपि च प्रजाः ॥ १५ ॥

2.16

अहार्षीद् दुःखम् आर्तानां द्विषतां चोर्जितं यशः ।अचैष्ते च नयैर् भूमिं भूयसा यशसैव च ॥ १६ ॥

2.17

अप्य् आसीद् दुःखितान् पश्यन् प्रकृत्या करुणात्मकः ।नाहौष्ते च यशो लोभाद् अन्यायाधिगतैर् धनैः ॥ १७ ॥

2.18

सौहार्दऋढभक्तित्वान् मैत्रेषु विगुणेष्व् अपि ।नादिदासीददित्सीत् तु सौमुख्यात् स्वं स्वम् अर्थवत् ॥ १८ ॥

2.19

अनिवेद्याग्रम् अर्हद्भ्यो नालिक्षत् हिं चिद् अप्लुतः ।गाम् अधर्मेण नाधुक्षत् क्षीरतर्षेण गाम् इव ॥ १९ ॥

2.20

नासृक्षद् बलिम् अप्राप्तं नारुक्षन् मानम् ऐश्वरम् ।आगमैर् बुद्धिम् आहिक्षद् धर्माय न तु कीर्तये ॥ २० ॥

2.21

क्लेशार्हान् अपि कांश् चि तु नाक्लिष्ट क्लिष्टकर्मणः ।आर्यभावाच् च नाघुक्षद् द्विषतोऽपि सतो गुणान् ॥ २१ ॥

2.22

आकृषद् वपुषा दृष्टीः प्रजानां चन्द्रमा इव ।परस्वं भुवि नामृक्षन् महाविषम् इवोरगम् ॥ २२ ॥

2.23

नाक्रुक्षद् विषये तस्य कश् चित् कैश् चित् क्व चित् क्षतः ।अदिक्षत् तस्य हस्तस्थम् आर्तेभ्यो ह्य् अभयं धनुः ॥ २३ ॥

2.24

कृतागसोऽपि प्रणतान् प्राग् एव प्रियकारिणः ।अदर्शत् स्निघया दृष्ट्या श्लक्ष्णेन वचसासिचत् ॥ २४ ॥

2.25

बह्वीर् अध्यगमद् विद्या विषयेष्व् अकुतूहलः ।अदर्शत् कार्तयुगे धर्मे धर्मात् कृच्छ्रेऽपि नास्रसत् ॥ २५ ॥

2.26

अवर्धिष्ट गुञैः शश्वद् अवृधन् मित्रसंपदा ।अवर्तिष्ट च वृद्धेषु नावृतद् गर्हिते पथि ॥ २६ ॥

2.27

शरैर् अशीशम् अच्छत्रून् गुणैर् बन्धून् अरीरमत् ।रन्ध्रैर् नाचूचुदद् भृत्यान् करैर् नापीपिडत् प्रजाः ॥ २७ ॥

2.28

रक्षणाच् चैव शौर्याच् च निखिलां गाम् अवीवपत् ।स्पष्टया दण्डनीत्या च रात्रिसत्त्रान् अवीवपत् ॥ २८ ॥

2.29

कुलं राजर्षिवृत्तेन यशोगन्धम् अवीवपत् ।दीप्त्या तम इवादित्यस् तेजसारीन् अवीवपत् ॥ २९ ॥

2.30

अपप्रथत् पितॄंश् चैव सत्पुत्रदऋशैर् गुणैः ।सलिलेनेव चाम्भोदो वृत्तेनाजिह्लदत् प्रजाः ॥ ३० ॥

2.31

दानैर् अजस्रविपुलैः सोमं विप्रान् असूषवत् ।राजधर्मस्थिअत्वाच् च काले सस्यम् असूषवत् ॥ ३१ ॥

2.32

अधर्मिष्ठाम् अचकथन् न कथाम् अकथङ्कतः ।चक्रवर्तीव च परान् धर्मायाभ्युदसीषहत् ॥ ३२ ॥

2.33

राष्ट्रम् अन्यत्र च बलेर् न स किङ् चिद् ददीदपत् ।भृत्यैर् एव च सोद्योगं द्विषद्दर्पम् अदीदपत् ॥ ३३ ॥

2.34

स्वैर् एवादीदपच् चापि भूयो भूयो गुणैः कुलम् ।प्रजा नादीदपच् चैव सर्वधर्मव्यवस्थया ॥ ३४ ॥

2.35

अश्रान्तः समये यज्वा वज्ञभूमिम् अमीमपत् ।पालनाच् च च्विजान् ब्रह्म निर्दुविग्नान् अमीमपत् ॥ ३५ ॥

2.36

गुरुभिर् विधिवत्काले सौम्यः सोमम् अमीमपत् ।तपसा तेजसा चैव द्विषत्सैन्यम् अमीमपत् ॥ ३६ ॥

2.37

प्रजाः परमधर्म्ज्ञः सूक्ष्मं धर्मम् अवीवसत् ।दर्शनाच् चैव धर्मस्य काले स्वर्गम् अवीवसत् ॥ ३७ ॥

2.38

व्यक्तम् अप्य् अर्थकृच्छ्रेषु नाधर्मिष्ठम् अतिष्ठिपत् ।प्रिय इत्य् एव चाशक्तं न संरागाद् अवीवृधत् ॥ ३८ ॥

2.39

तेजसा च त्विषा चैव रिपून् दृप्तान् अभीभसत् ।यशोदीपेन दीप्तेन पृथिवीं च व्यभीभसत् ॥ ३९ ॥

2.40

आनृशंस्यान् न यशसे तेनादायि सदार्थिने ।द्रव्यं महद् अपि त्यक्त्वा न चैवाकीर्ति किं चन ॥ ४० ॥

2.41

तेनारिर् आपि दुःखार्तो नात्याजि शरणागतः ।जित्वा दृप्तान् अपि रिपून् न तेनाकारि विस्मयः ॥ ४१ ॥

2.42

न तेनाभेदि मार्यादा कामाद् द्वेषाद् भयाद् अपि ।तेन सत्स्व् अपि भोगेषु नासेवीन्द्रियवृत्तिता ॥ ४२ ॥

2.43

न तेनादर्शि विषमं कार्यङ् क्व चन किं चन ।विप्रियप्रिययोः कृत्ये न तेनागामि निक्रियाः ॥ ४३ ॥

2.44

तेनापायि यथाकल्पं सोमश् च यश एव च ।वेदश् चाम्नायि सततं वेदोक्तो धर्म एव च ॥ ४४ ॥

2.45

एवमादिभिर् अत्यक्तो बभूवासुलभैर् गुणैः ।अशक्यशक्यसामन्तः शाक्यराजः स शक्रवत् ॥ ४५ ॥

2.46

अथ तस्मिन् तथा काले धर्मकामा दिवौकसः ।विचेरुर् दिशि लोकस्य धर्मचर्या दिदृक्षवः ॥ ४६ ॥

2.47

धर्मात्मानश् चरन्तस् ते धर्मजिज्ञासया जगत् ।ददृशुस् तं विशेषेण धर्मात्मानं नराधिपम् ॥ ४७ ॥

2.48

देवेभ्यस् तुषितेभ्योऽथ बोधिसत्त्वः क्षितिं व्रजन् ।उपपत्तिं प्रणिदधे कुले तस्य महीपतेः ॥ ४८ ॥

2.49

तस्य देवी नृदेवस्य माया नाम तदाभवत् ।वीतक्रोधतमोमाया मायेव दिवि देवता ॥ ४९ ॥

2.50

स्वप्नेऽथ समये गर्भम् आविशन्तं ददर्श सा ।षड्दन्तं वारणं श्वेतम् ऐरावतम् इवौजसा ॥ ५० ॥

2.51

तं विनिर्दिदिषुः श्रुत्वा स्वप्नं स्वप्नविदो द्विजाः ।तस्य जन्म कुमारस्य लक्ष्मीधर्मयशोभृतः ॥ ५१ ॥

2.52

तस्य सत्त्वविशेषस्य जातौ जातिक्षयैषिनः ।साचला प्रचचालोर्वी तरङ्गाभिहतेव नौः ॥ ५२ ॥

2.53

सूर्यरश्मिभिर् अक्लिष्टं पुष्पवर्षं पपात खात् ।दिग्वारणकराधूताद् वनाच् चैत्ररथाद् इव ॥ ५३ ॥

2.54

दिवि दुन्दुभयो नेदुर् दीव्यतां मरुताम् इव ।दिदीपेऽभ्यधिअं सूर्यः शिवश् च पवनो ववौ ॥ ५४ ॥

2.55

तुतुषुस् तुषिताश् चैव शुद्धावासाश् च देवताः ।सद्धर्मबहुमानेन सत्त्वानां चानुकम्पया ॥ ५५ ॥

2.56

समाययौ यशःकेतुं श्रेयःकेतुकरः परः ।बभ्राजे शान्तया लक्ष्म्या धर्मो विग्रहवान् इव ॥ ५६ ॥

2.57

देव्याम् अपि यवीयस्याम् अरण्याम् इव पावकः ।नन्दो नाम सुतो जज्ञे नित्यानन्दकरः कुले ॥ ५७ ॥

2.58

दीर्घबाहुर् महावक्षाः सिंहांसो वृसभेक्षनः ।वपुषाग्र्येण यो नाम सुन्दरोपपदं दधे ॥ ५८ ॥

2.59

मधुमास इव प्राप्तश् चन्द्रो नअ इवोदितः ।अङ्गवान् इव चानङ्गः स बभौ कान्तया श्रिया ॥ ५९ ॥

2.60

स तौ संवर्धयामास नरेन्द्रः परया मुदा ।अर्थः सज्जनहस्तस्थो धर्मकामौ महान् इव ॥ ६० ॥

2.61

तस्य कालेन सत्पुत्रौ ववृधाते भवाय तौ ।आर्यस्यारम्भमहतो दर्मार्थाव् इव भूतये ॥ ६१ ॥

2.62

तयोः सत्पुत्रयोर् मध्ये शाक्यराजो रराज सः ।मध्यदेश इव व्यक्तो हिमवत्पारिपात्रयोः ॥ ६२ ॥

2.63

ततस् तयोः संस्कृतयोः क्रमेण नरेन्द्रसून्वोः कृतविद्ययोश् च ।कामेष्व् अजस्रङ् प्रममाद नन्दः सर्वार्थसिद्धस् तु न संरर‍ञ्ज ॥ ६३ ॥

2.64

स प्रेक्श्यैव हि जीर्णम् आतुरङ् च मृतङ् च विमृशन् जगदन्भिज्ञम् आर्तचित्तः ।हृदयगतपरघृणो न विषयरतिम् अगमज् जननमरणभयम् अभितो विजिघांसुः ॥ ६४ ॥

2.65

उद्वेगाद् अपुनर्भवे मनः प्रणिधाय स ययौ शयितवराङ्गनादनास्थः ।निशि नृपतिनिलयनाद् वनगमन्कृत्मनाः सरस इव मथितनलिनात् कलहंसः ॥ ६५ ॥

2.66

सौन्दरनन्दे महाकाव्ये राजवर्णनो नाम द्वितीयः सर्गः ।

3.head

तृतीयः सर्गः

3.1

तपसे ततः कपिलवास्तु हयगरथौघसंकुलम् ।श्रीमद् अभयम् अनुरक्तजनं स विहाय विश्चितमना वनं ययौ ॥ १ ॥

3.2

विविधाग्मांस् तपसि तांश् च विविधनियमाश्रयान् मुनीन् ।प्रेक्ष्य स विषयतृआकृपणान् अनवस्थितं तप इति न्यवर्तत ॥ २ ॥

3.3

अथ मोक्षवादिनम् अराडम् उपशममतिं तथोड्रकम् ।तत्त्वकृतमतिर् उपास्य जहावयम् अप्य् अमार्ग इति मागकोविदः ॥ ३ ॥

3.4

स विचारयन् जगति किं नु परमम् इति तं तम् आगमम् ।निश्चयम् अनधिगतः परतः परमं चचार तप एव दुष्करम् ॥ ४ ॥

3.5

अथ नैष मार्ग इति विक्ष्य तद् अपि विपुलं जहौ तपः ।ध्यानविषयम् अवगम्य परं बुभुजे वरान्नम् अमृतत्वबुद्धये ॥ ५ ॥

3.6

स सुवर्णपीनयुगबाहुर् ऋषभगतिर् आयतेक्षणः ।प्लक्षम् अवनिरुहम् अभ्यगमत् परमस्य निश्चयविधेर् बुभुत्सया ॥ ६ ॥

3.7

उपविश्य तत्र कृतबुद्धिर् अचल्धृतिर् अद्रिराजवत् ।मारबलम् अजयद् उग्रम् अथो बुबुधे पदं शिवम् अहार्यम् अव्ययम् ॥ ७ ॥

3.8

अवगम्य तं च कृतकार्यम् अमृतमनसो दिवौकसः ।हर्षम् अतुलम् अगमन् मुदिता विमुखी तु मारपरिषत् प्रचुक्षुभे ॥ ८ ॥

3.9

सनगा च भूः प्रविचाल हुतवहसकः शिवो ववौ ।नेदुर् अपि च सुरदुन्दुभयः प्रववर्ष चाम्बुधरवर्जितं नभः ॥ ९ ॥

3.10

अवबुध्य चैव परमार्थम् अजरम् अनुकम्पया विभुः ।नित्यम् अमृतम् उपदर्श्यितुं स वराञसीपरिकराम् अयात् पुरीम् ॥ १० ॥

3.11

अथ धर्मचक्रम् ऋतनाभि धृतिमतिसमाधिनेमिमत् ।तत्र विनयनिमारम् ऋषिर् जगतो हिताय परिषद्य् अवर्तयत् ॥ ११ ॥

3.12

इति दुःखम् एतद् इयम् अस्य समुदयलता प्रवर्तिका ।शान्तिर् इयम् अयम् उपाय इति प्रविभागशः परम् इदं चतुष्टयम् ॥ १२ ॥

3.13

अभिधाय च त्रिपरिवर्तम् अतुलम् अनिवर्त्यम् उत्तमम् ।द्वादशनियतविकल्पम् ऋषिर् विनिनाय कौण्डिनसगोत्रम् आदितः ॥ १३ ॥

3.14

स हि दोषसागरम् अगाधम् उपधिजलम् आधिजनुत्कम् ।क्रोधमदभयतर्ङ्गचलं प्रततार लोकम् अपि व्यतारयत् ॥ १४ ॥

3.15

स विनीय काशिषु गयेषु बहुजनम् अथो गिरिव्रजे ।पित्र्यम् अपि परमकारुणिको नगरं ययाव् अनुजिघृक्षया तदा ॥ १५ ॥

3.16

विषयात्मकस्य हि इअनस्य बहुविविधमार्गसेविनः ।सूर्यसदृशवपुर् अभ्युदितो विजहार सूर्य इव गौतमस् तमः ॥ १६ ॥

3.17

अभितस् ततः कपिलवास्तु परमशुभवास्तुसंस्तुतम् ।वस्तुमतिशुचि शिवोपवनं स ददर्श निःस्पृहतया यथा वनम् ॥ १७ ॥

3.18

अपरिग्रहः स हि बभूव नियतमतिर् आत्मनीश्वरः ।नैकविधभयकरेषु किमु स्वजनस्वदेशजनमित्रवस्तुषु ॥ १८ ॥

3.19

प्रतिपूजया न स जहर्ष न च शुचम् अवज्ञयागमत् ।निश्चितमतिर् असिचन्दनयोर् न जगाम दुःखसुखयोश् च विक्रियाम् ॥ १९ ॥

3.20

अथ पार्थिवः समुपलभ्य सुतम् उपगतं तथागतम् ।तूर्णम् अबभुतुरगानुगतः सुतदर्शनोत्सुकतयाभिनिर्ययौ ॥ २० ॥

3.21

सुगतस् तथागतम् अवेक्ष्य नरपतिम् अधीरम् आशया ।शेषम् अपि च जनम् अश्रुमुखं विनीषय गगनम् उत्पपात ह ॥ २१ ॥

3.22

स विचक्रमे दिवि भुवीव पुनर् उपविवेश तस्थिवान् ।निश्चलमतिर् अशयिष्ट पुनर् बहुधाभवत् पुनर् अभूत् तथैकधा ॥ २२ ॥

3.23

सलिले क्षिताव् इव चचार जलम् इव विवेष मेदिनीम् ।मेघ इव दिवि ववर्ष पुनः पुनर् अज्वलन् नव इवोदितो रविः ॥ २३ ॥

3.24

युगपज् ज्वलन् ज्वलनवच् च जलम् अवसृहंश् च मेघवत् ।तप्तकनकसदृशप्रभया स बभौ प्रदीप्त इव सन्ध्यया घनः ॥ २४ ॥

3.25

तम् उदीक्ष्य हेममणिजालवलयिनम् इवोत्थितं ध्वजम् ।प्रीतिम् अगमद् अतुलां नृपतिर् जनता नताश् च बहुमानम् अभ्ययुः ॥ २५ ॥

3.26

अथ भाजनीकृतम् अवेक्ष्य मनुजपतिम् ऋद्धिसंपदा ।पौरजनम् अपि च तत्प्रवणं निजगाद धर्मविनयं विनायकः ॥ २६ ॥

3.27

नृपतिस् ततः प्रथमम् आप फलम् अमृतधर्मसिद्धयोः ।धर्मम् अतुलम् अधिगम्य मुनेर् मुनये ननाम स यतो गुराव् इव ॥ २७ ॥

3.28

बहवः प्रसन्नमनसोऽथ जननमरणार्तिभीरवः ।शाक्यतनयवृषभाः कृतिनो वृषभा इन्वानलभयात् प्रवव्रजुः ॥ २८ ॥

3.29

विजहुस् तु येऽपि न गृहाणि तनयपितृमात्रपेक्षया ।तेऽपि नियमविधिमामरणाज् जगृहुश् च युक्तमनसश् च दध्रिरे ॥ २९ ॥

3.30

न जिहिंस सूक्ष्मम् अपि जन्तुम् अपि परवधोपजीवनः ।किं बत विपुलगुञः कुलजः सदयः सदा किमु मुनेर् उपासया ॥ ३० ॥

3.31

अकृशोध्यमः कृशधनोऽपि परपरिभवासहोऽपि सन् ।नान्यधनम् अपजहार तथा भुजगाद् इवान्यविभवाद् धि विव्यथे ॥ ३१ ॥

3.32

विभवान्वितोऽपि तरुणोऽपि विषयचपलेन्द्रियोऽपि सन् ।नैव च परयुवतीर् अगमत् परमं हि ता धनतोऽप्य् अमन्यत ॥ ३२ ॥

3.33

अनृतं जगाद न च कश् चिद् ऋतम् अपि जजल्प नाप्रियम् ।श्लक्ष्णम् अपि च न जगाव् अहितं हितम् अप्य् उवाच न च पैशुनाय यत् ॥ ३३ ॥

3.34

मनसा लुलोभ न च जातु परवसुषु गृद्धमानसः ।कामसुखम् असुखतो विमृशन् विजहार तृप्त इव तत्र सज्जनः ॥ ३४ ॥

3.35

न परस्य कश् चिद् अपघातम् अपि च स्गृणो व्यचिन्तयत् ।मातृपितृसुतसुहृत्सदृशं स ददर्श तत्र हि परस् परं जनः ॥ ३५ ॥

3.36

नियतं भविष्यति परत्र भवद् अपि च भूतम् अप्य् अथो ।कर्मफलम् अपि च लोकगतिर् नियतेति दर्शनम् अवाप साधु च ॥ ३६ ॥

3.37

इति कर्मञा दशविधेन परमकुशलेन भूरिणा ।भ्रंशिनि शितहिलगुणोऽपि युगे विजहार तत्र मुन्संश्रयज् जनः ॥ ३७ ॥

3.38

न च तत्र कश् चिद् उपपत्तिसुखम् अभिललाष तैर् गुणैः ।सर्वम् अशिवम् अवगम्य भवं भवसंक्षयाय ववृते न जन्मने ॥ ३८ ॥

3.39

अकथङ्कथा गृहिण एव परमपरिशुद्धदृष्तयः ।स्रोतसि हि ववृतिरे बहवो रजसस् तनुत्वम् अपि चक्रिरे परे ॥ ३९ ॥

3.40

ववृतेऽत्र योऽपि विषमेषु विभवदृशेषु कश् चन ।त्यागविनयनियमाभिरतो विजहार सोऽपि न चचाल सत्पथात् ॥ ४० ॥

3.41

अपि च स्वतोऽपि परतोऽपि न भयम् अभवन् न दैवतः ।तत्र च सुसुखसुभिक्षगुणैर् जहृषुः प्रजाः कृतयुगे मनोर् इव ॥ ४१ ॥

3.42

इति मुदितम् अनामयं निरापत् कुरुरघुपुरुपुरोपमं पुरं तत् ।अभवद् अभयदैशिके महर्षौ विहरति तत्र शिवाय वीतरागे ॥ ४२ ॥

3.43

सौन्दरनन्दे महाकाव्ये तथागथवर्णनो नाम तृतीयः सर्गः ।

4.head

चतुर्थः सर्गः

4.1

मुनौ ब्रुवाञेऽपि तु तत्र धर्मं धर्मं प्रति ज्ञातिषु चादृतेषु ।प्रासादसंस्थो मदनैककार्यः प्रियासहायो विजहार नन्दः ॥ १ ॥

4.2

स चक्रवाक्येव हि चक्रवाकस् तया समेतः प्रियया प्रियार्हः ।नाचिन्तयद् वैश्रमणं न शक्रं तस्थानहेतोः कुत एव धर्मम् ॥ २ ॥

4.3

लक्ष्म्या च रूपेण च सुन्दरीति स्तम्भेन गर्वेण च मानिनीति ।दीप्त्या च मानेन च भामिनीति यतो बभाषे त्रिविधेन नाम्ना ॥ ३ ॥

4.4

सा हासहंसा नयन्द्विरेफा पीनस्तनात्युन्नतपद्मकोशा ।भूयो बभासे स्वकुलोदितेन स्त्रीपद्मिनी नन्ददिवाकरेण ॥ ४ ॥

4.5

रूपेण चात्यन्तमनोहरेण रूपानुरूपेण च चेष्टितेन ।मनुष्यलोके हि तदा बभूव सा सुन्दरी स्त्रीषु नरेषु नन्दः ॥ ५ ॥

4.6

सा देवता नन्दनचारिणीव कुलस्य नन्दीजननश् च नन्दः ।अतीत्य मर्त्यान् अनुपेत्य देवान् सृष्टाव् अभूताम् इव भूतधात्रा ॥ ६ ॥

4.7

तां सुन्दरीं चेन् न लभेत नन्दः सा वा निषेवेत न तं नतभ्रूः ।द्वन्दं ध्रुवं तद् विकलं न शोभेतान्योन्यहीनाव् इव रात्रिचन्द्रौ ॥ ७ ॥

4.8

कन्दर्परत्योर् इव लक्ष्यभूतं प्रमोदनान्द्योर् इव नीडभूतम् ।प्रहर्षतुष्ट्योर् इव पात्रभूतं द्वन्दं सहारंस्त मदान्धभूतम् ॥ ८ ॥

4.9

परस्परोद्वीक्षणतत्पराक्षं परस्परव्याहृतसक्तचित्तम् ।परस्पराश्लेषहृताण्गरागं परस्परं तन् मिथुनं जहार ॥ ९ ॥

4.10

भावानुरक्तौ गिरिनिर्झरस्थौ तौ किंनरीकिंपुरुषाव् इवोभौ ।चिक्रीडतुश् चाभिविरेजतुश् च रूपश्रियान्योन्यम् इवाक्षिपन्तौ ॥ १० ॥

4.11

अन्योन्यसंरागविवर्धनेन तद् द्वन्द्वम् अन्योन्यम् अरीरमच् च ।क्लमान्तरेऽन्योन्यविनोदनेन सलीलम् अन्योन्यम् अमीमदच् च ॥ ११ ॥

4.12

विभूषयाम् आस ततः प्रियां स सिषेविषुस् तां न मृजावहार्थम् ।स्वेनैव रूपेण विभूषिता हि विभूषणानाम् अपि भुषणं सा ॥ १२ ॥

4.13

दत्त्वाथ सा दर्पणम् अस्य हस्ते ममाग्रतो धारय तावद् एनम् ।विशेषकं यावद् अहं करोमीत्य् उवाच कान्तं स च तं बभार ॥ १३ ॥

4.14

भर्तुस् ततः श्मश्रु निरीक्षमाणा विशेषकङ् सापि चकार तादृक् ।निश्वासवातेन च दर्पञस्य चिकित्सयित्वा निजघान नन्दः ॥ १४ ॥

4.15

सा तेन चेष्टाललितेन भर्तुः शाठ्येन चान्तर्मनसा जहास ।भवेच् च रुष्टा किल नाम तस्मै ललाटजिह्मां भृकुटिं चकार ॥ १५ ॥

4.16

चिक्षेप कर्णोत्पलम् अस्य चांसे करेञ सव्येन मदालसेन ।पत्त्राङ्गुलिं चार्धनिमीलिताक्षे वक्त्रेऽस्य ताम् एव विनिर्दुधाव ॥ १६ ॥

4.17

ततश् चलन्नूपुरयोक्रिताभ्यां नखप्रभोधासितराङ्गुलिभ्याम् ।पध्यां प्रियाया नलिनोपमाभ्यां मूर्ध्ना भयान् नाम ननाम नदः ॥ १७ ॥

4.18

स मुक्तपुष्पोन्मिषितेन मूर्ध्ना ततः प्रियायाः प्रियकृद् बभासे ।सुवर्णवेद्याम् अनिलावभग्नः पुष्पातिभाराद् इव नागवृक्षः ॥ १८ ॥

4.19

सा तं स्तनोद्वर्तितहारष्टिर् उत्थापयाम् आस निपीड्य दोर्भ्याम् ।कथं कृतोऽसीति जहास चोच्चैर् मुखेन साचीकृतकुण्डलेन ॥ १९ ॥

4.20

पत्युस् ततो दर्पणसक्तपाणेर् मुहुर्मुहुर् वक्त्रम् अवेक्षमाणा ।तमालपत्त्रार्द्रतले कपोले समापयामास विशेषकं तत् ॥ २० ॥

4.21

तस्या मुखङ् तत् सतमालपत्त्रङ् ताम्राधरौष्ठं चिकुरायताक्षम् ।रक्ताधिकाग्रं पतितद्विरेफङ् सशैवलङ् पद्मम् इवाबभासे ॥ २१ ॥

4.22

नन्दस् ततो दर्पणम् आदरेण बिभ्रत् तदामण्डनसाक्षिभूतम् ।विशेषकावेक्षणकेकराक्षो लडत् प्रियाया वदनं ददर्श ॥ २२ ॥

4.23

तत् कुण्डलादष्टविशेषकान्तं कारण्डवक्लिष्टम् इवारविन्दम् ।नन्दः प्रियाया मुखम् ईक्षमाणो भूयः प्रियानन्दकरो बभूव ॥ २३ ॥

4.24

विमानकल्पे स विमानगर्भे ततस् तथा चैव नन्दन नन्दः ।तथागतश् चागतभैक्षकालो भैक्षाय तस्य प्रविवेष वेश्म ॥ २४ ॥

4.25

अवाङ्मुखो निष्प्रणयश् च तस्थौ भ्रातु गृहेऽन्यस्य गृहे यथैव ।तस्माद् अथो प्रेष्यजनप्रमादाद् भिक्षाम् अलब्ध्वैव पुनर् जगाम ॥ २५ ॥

4.26

का चित् पिपेषाङ्गविलेपनं हि वासोऽङ्गना का चिद् अवासयच् च ।अयोजयत् स्नानविधिं तथान्या जग्रन्थुर् अन्याः सुरभीः स्रजश् च ॥ २६ ॥

4.27

तस्मिन् गृहे भर्तुर् अतश् चरन्त्यः क्रीडानुरूपं ललितं नियोगम् ।काश् चिन् न बुद्धं ददृशुर् युवत्यो बुद्धस्य वैषा नियतङ् मनीषा ॥ २७ ॥

4.28

का चित् स्थिता तत्र तु हर्म्यपृष्ठे गवाक्षपक्षे प्रणिधाय चक्षुः ।विनिष्पतन्तं सुगतं ददर्श पयोदगर्भाद् इव दीप्तम् अर्कम् ॥ २८ ॥

4.29

सा गौरवं तत्र विचार्य भर्तुः स्वया च भक्त्यार्हतयार्हतश् च ।नन्दस्य तस्थौ पुरतो विवक्षुस् तदाज्ञया चेति तदाचचक्षे ॥ २९ ॥

4.30

अनुग्रहायास्य जनस्य शङ्के गुरुर् गृहं नो भगवान् प्रविष्टः ।भिक्षाम् अलब्ध्वा गिरम् आसनं वा सून्याद् अरण्याद् इव याति भूयः ॥ ३० ॥

4.31

श्रुत्वा महर्षेः स गृहप्रवेशं सत्कारहीनं च पुनःप्रयाणम् ।चचाल चित्राभरणाम्बरस्रक् कल्पद्रुमो धूत इवानिलेन ॥ ३१ ॥

4.32

कृत्वाञ्जलिं मूर्धनि पद्मकल्पं ततः स कान्तां गमनं ययाचे ।कर्तुं गमिष्यामि गुरौ प्रणामं माम् अभ्यनुज्ञातुम् इहार्हसीति ॥ ३२ ॥

4.33

सा वेपमाना परिसस्वजे तं शालं लता वातसमीरितेव ।ददर्श चाशुप्लुतलोलनेत्रा दीर्घं च निश्वस्य वचोऽभ्युवाच ॥ ३३ ॥

4.34

नाहं यियासोर् गुरुदर्शनार्थम् अर्हामि कर्तुं तव धर्मपीडाम् ।गच्छार्यपुत्रैहि च शीघ्रम् एव विशेषको यावद् अयङ् न शुष्कः ॥ ३४ ॥

4.35

सचेद् भवेस् त्वं खलु दीर्घसूत्रो दण्दं महान्तं त्वयि पातयेयम् ।मुहुर्मुहुस् त्वां शयितं कुचाभ्यां विबोधयेयं च न चालपेयम् ॥ ३५ ॥

4.36

अथाप्य् अनाश्यानविशेषकायां मय्य् एष्यसि त्वं त्वरितं ततस् त्वाम् ।निपीडयिष्यामि भुजद्वयेन निर्भूषणेनार्द्रविलेपनेन ॥ ३६ ॥

4.37

इत्य् एवम् उक्तश् च निपीडितश् च तयासवर्णस्वनया जगाद ।एवं करिष्यामि विमुञ्च चण्डि यावद् गुरुर् दूरगतो न मे सः ॥ ३७ ॥

4.38

ततः स्तनोद्वर्तितचन्दनाभ्यां मुक्तो भुजाभ्यां न तु मानसेन ।विहाय वेषं मदनानुरूपं सत्कारयोग्यं स वपुर् बभार ॥ ३८ ॥

4.39

सा तं प्रयान्तं रमणं प्रदध्यौ प्रध्यानशून्यस्थितनिश्चलाक्षी ।स्थितोच्चकर्णा व्यपविद्धशष्पा भ्रान्तस् मृगं भ्रान्तं मृगङ् भ्रान्तं मुखी मृगीव ॥ ३९ ॥

4.40

दिदृक्षयाक्षिप्तमना मुनेस् तु नन्दः प्रयाणं प्रति तत्वरे च ।विवृत्तदृष्टिश् च शनैर् ययौ तां करीव पश्यन् स लडत्करेजुम् ॥ ४० ॥

4.41

छातोदरिं पीनपयोधरोरुं स सुन्दरीं रुक्मदरीम् इवाद्रेः ।काक्षेण पश्यन् न ततर्प नन्दः पिबन्न् इवैकेन जलं करेण ॥ ४१ ॥

4.42

तङ् गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनर् आचकर्ष ।सऽनिश्चयान् नापि ययौ न तस्थौ तुरंस् तरङ्गेष्व् इव राजहंसः ॥ ४२ ॥

4.43

अदर्शनं तूपगतश् च तस्या हर्म्यात् ततश् चावततार तूर्णम् ।श्रुत्वा ततो नूपुरनिस्वनं स पुनर् ललम्बे हृदये गृहीतः ॥ ४३ ॥

4.44

स कामरागेञ निगृह्यमाणो धर्मानुरागेञ च कृष्यमाणः ।जगाम दुःखेन विवर्त्यमानः प्लवः प्रतिस्रोत इवापगायाः ॥ ४४ ॥

4.45

ततः क्रमैर् दीर्घतमैः प्रचक्रमे कतं नु यातो न गुरुर् भवेद् इति ।स्वजेय तां चैव विशेषकप्रियां कथं प्रियाम् आर्द्रविशेषकाम् इति ॥ ४५ ॥

4.46

अथ स पथि ददर्श मुक्तमानं पितृनगरेऽपि तथागताभिमानम् ।दशबलम् अभितो विलम्बमानं ध्वजम् अनुयान इवैन्द्रम् अर्च्यमानम् ॥ ४६ ॥

4.47

सौन्दरनन्दे महाकाव्ये भार्यायाचितको नाम चतुर्थः सर्गः ।

5.head

पञ्चमः सर्गः

5.1

अथावतीर्याश्वरथद्विपेभ्यः शाक्या यथास्वर्द्धि गृहीतवेषाः ।महापणेभ्यो व्यवहारिणश् च महामुनौ भक्तिवशात् प्रणेमुः ॥ १ ॥

5.2

के चित् प्रणम्यानुययुर् म्हूर्तङ् के चित् प्रणम्यार्थवशेन जग्मुः ।के चित् स्वकेष्व् आवस्थेषु तस्तुः कृत्वाञ्जलीन् विक्षणतत्पराक्षाः ॥ २ ॥

5.3

बुद्धस् ततस् तत्र नरेन्द्रमार्ग स्रोतो महद्भक्तिमतो जनस्य ।जगाम दुऊखेन विगाहमानो जलागमे स्रोत इवापगायाः ॥ ३ ॥

5.4

अथो महद्भिः पथि संपतद्भिः संपूज्यमानाय तथागताय ।कर्तुं प्रञामं न शशाक नन्दस् तेनाभिरेमे तु गुरोर् महिम्ना ॥ ४ ॥

5.5

स्वं चावसङ्गं पथि निर्मुमुक्षुर् भक्तिं जनस्यान्यमतेश् च रक्षन् ।नन्दं च गेहाभिमुखं जिघृक्षन् मार्गं ततोऽन्यं सुगतः प्रपेदे ॥ ५ ॥

5.6

ततो विविक्तं च विविक्तचेताः सन्मार्गविन् मार्गम् अभिप्रतस्थे ।गत्वाग्रतश् चाग्र्यतमाय तस्मै नान्दीविमुक्ताय ननाम नद्नः ॥ ६ ॥

5.7

शनैर् व्रजन्न् एव स गौरवेण पटावृतांसो विनतार्धकायः ।अधोनिबद्धाञ्जलिर् ऊर्ध्वनेत्रः सगद्गदं वाक्यम् इदं बभाषे ॥ ७ ॥

5.8

प्रासादसंस्थो भवन्तम् अन्तःप्रविष्टम् अश्रौषम् अनुग्रहाय ।अतस् त्वरावान् अहम् अभ्युपेतो गृहस्य कक्ष्यामहतोऽभसूयन् ॥ ८ ॥

5.9

तत् साधु साधुप्रिय मत्प्रियार्थं तत्रास्तु बिक्षूत्तम भैक्षकाल्सः ।असौ हि मध्यं नभसो यियासुः कालं प्रतिस्मारयतीव सूर्यः ॥ ९ ॥

5.10

इत्य् एवम् उक्तः प्रणतेन तेन स्नेहाभिमानोन्मुखलोचनेन ।तादृङ्निमित्तं सुगतश् चकार नाहारकृत्यं स यथा विवेद ॥ १० ॥

5.11

ततः स कृत्वा मुनये प्रणामं गृहप्रयाणाय मतिं चकार ।अनुग्रहार्थं सुगतस् तु तस्मै पात्रं ददौ पुष्करपत्त्रनेत्रः ॥ ११ ॥

5.12

ततः स लोके ददतः फलार्थं पात्रस्य तस्याप्रतिमस्य पात्रम् ।जग्राह चापग्रहणक्षंआभ्यां पद्मोपमाभ्यां प्रयतः कराभ्याम् ॥ १२ ॥

5.13

पराङ्मुखस् त्व् अन्यमनस्कम् आराद् विज्ञाय नन्दः सुगतं गतास्थम् ।हस्तस्थपात्रोऽपि गृह यियासुः ससार मार्गान् मुनिम् ईक्षमाणः ॥ १३ ॥

5.14

भार्यानुरागेण यदा गृहं स पात्रं गृहीत्वापि यियासुर् एव ।विमोहयाम् आस मुनिस् ततस् तं रथ्यामुखस्यावरणेन तस्य ॥ १४ ॥

5.15

निर्मोक्षबीजं हि ददर्श तस्य ज्ञनं मृदु क्लेशरजश् च तीव्रम् ।क्लेशानुकूलं विषयात्मकङ् च नन्दं यतस् तं मुनिर् आचकर्ष ॥ १५ ॥

5.16

संक्लेशपक्षो द्विविधश् च दृष्टस् तथा द्विकल्पो व्यवदानपक्षः ।आत्माश्रयो हेतुबलाधिकस्य बाह्याश्रयः प्रत्ययगौरवस्य ॥ १६ ॥

5.17

अयत्नतो हेतुबलाधिकस् तु निर्मुच्यते घट्टितमात्र एव ।यत्नेन तु प्रत्ययनेयबुद्धिर् विमोक्षम् आप्नोति पराश्रयेण ॥ १७ ॥

5.18

नन्दः स च प्रत्ययनेयचेता यं शिश्रिये तन्मयताम् अवाप ।यस्माद् इमं तत्र चकार यत्नं तं स्नेहपङ्कान् मुनिर् उज्जिहीर्षम् ॥ १८ ॥

5.19

नन्दस् तु दुःखेन विचेष्टमानः शनैर् अगत्या गुरुम् अन्वगच्छत् ।भार्यामुखं वीक्षणलोलनेत्रं विचिन्तयन्न् आर्द्रविशेषकं तत् ॥ १९ ॥

5.20

ततो मुनिस् तं प्रियमाल्यहारं वसन्तमासेन कृताभिहारम् ।निनाय भग्नप्रमदाविहारं विद्याविहाराभिमतं विहारम् ॥ २० ॥

5.21

दीनं महाकारुणिकस् ततस् तं दृष्ट्वा मुहूर्तं करुणायमानः ।करेण चक्राङ्कतलेन मूर्ध्नि पस्पर्श चैवेदम् उवाच चैनम् ॥ २१ ॥

5.22

यावन् न हिंस्रः समुपैति कालः शमाय तावत् कुरु सौम्य बुद्धिम् ।सर्वास्व् अवस्थास्व् इह वर्तमानः सर्वाभिसारेण निहन्ति मृत्युः ॥ २२ ॥

5.23

साधारणात् स्वप्ननिभादसाराल् लोलं मनः कामसुखान् नियच्छ ।हव्यैर् इवाग्नेः पवनेरितस्य लोकस्य कामैर् न हि तृप्तिर् अस्ति ॥ २३ ॥

5.24

श्रद्धाधनं श्रेष्ठतमं धनेभ्यः प्रज्ञारसस् तृप्तिर् रसेभ्यः ।प्रधानमध्यात्मसुखं सुखेभ्यो विद्यारतिर् दुःखतत्मा रतिभ्यः ॥ २४ ॥

5.25

हितस्य वक्ता प्रवरः सुहृद्भ्यो धर्माय खेदो गुणवान् श्रमेभ्यः ।ज्ञानाय कृत्यं परमं क्रियाभ्यः किम् इन्द्रियाणाम् उपगम्य दास्यम् ॥ २५ ॥

5.26

तन् निश्चितं भीक्लमशुग्वियुक्तं परेष्व् अनायत्तम् अहार्यम् अन्यैः ।नित्यं शिवं शान्तिसुखं वृणीष्व किम् इन्द्रियार्थार्थम् अनर्थम् ऊढ्वा ॥ २६ ॥

5.27

जरासमा नास्त्य् अमृजा प्रजानां व्याधेः समो नास्ति जगत्य् अनर्थः ।मृत्योः समं नास्ति भयं पृथिव्याम् एतत् त्रयं खल्व् अवशेन सेव्यम् ॥ २७ ॥

5.28

स्नेहेन कश् चिन् न समोऽस्ति पाशः स्रोतो न तृणासमम् अस्ति हारि ।रागाग्निना नास्ति समस् तथाग्निस् तच् चेत् त्रयं नास्ति सुखं च तेऽस्ति ॥ २८ ॥

5.29

अवश्यभावि प्रियविप्रयोगस् तस्माच् च शोको नियतं विषेव्यः ।शोकेन चोन्मादम् उपेयिवांसो राजर्षयोऽन्येऽप्य् अवशा विचेलुः ॥ २९ ॥

5.30

प्रज्ञामयं वर्म बधान तस्मान् नो क्षान्तिनिघ्नस्य हि शोकबाणाः ।महच् च दग्धुं भवकक्षजालं संधुक्षयाल्पाग्निम् इवात्मतेजः ॥ ३० ॥

5.31

यथौषधैर् हस्तगतैः सविद्यो न दश्यते कश् चन पन्नगेन ।तथानपेक्षो जितलोकमोहो न दश्यते शोकभुजङ्गमेन ॥ ३१ ॥

5.32

आस्थाय योगं परिगम्य तत्त्वं न त्रासम् आगच्छति मृत्युकाले ।आबद्धवर्मा सुधनुः कृतास्त्रो जिगीषया शूर इवाहवस्थः ॥ ३२ ॥

5.33

इत्य् एवम् उक्तः स तथागतेन सर्वेषु भूतेष्व् अनुकम्पकेन ।धृष्टं गिरान्तर्हृदयेन सीदंस् तथेति नन्दः सुगतं बभाषे ॥ ३३ ॥

5.34

अथ प्रमादाच् च तम् उज्जिहीर्षन् मत्वागमस्यैव च पात्रभूतम् ।प्रव्राजयानन्द शमाय नन्दम् इत्य् अब्रवीन् मैत्रमना महर्षिः ॥ ३४ ॥

5.35

नन्दं ततोऽन्तर्मनसा रुदन्तम् एहीति वैदेहमुनिर् जगाद ।शनैस् ततस् तं समुपेत्य नन्दो न प्रव्रजिष्याम्य् अहम् इत्य् उवाच ॥ ३५ ॥

5.36

श्रुत्वाथ नन्दस्य मनीषितं तद् बुद्धाय वैदेहमुनिः शशंस ।संश्रुत्य तस्माद् अपि तस्य भावं महामुनिर् नन्दम् उवाच भूयः ॥ ३६ ॥

5.37

मय्य् अग्रजे प्रव्रजितेऽजितात्मन् भ्रातृष्व् अनुप्रव्रजितेषु चास्मान् ।ज्ञातींश् तस्माद् अपि तस्य भावं महामुनिर् नन्दम् उवाच भूयः ॥ ३७ ॥

5.38

राजर्षयस् ते विदिता न नूनं वनानि ये शिश्रियिरे हसन्तः ।निष्ठीव्य कामान् उपशान्तिकामाः कामेषु नैवं कृपणेषु सक्ताः ॥ ३८ ॥

5.39

भूयः समालोक्य गृहेषु दोषान् निशाम्य तत्त्यागकृतं च शर्म ।नैवास्ति मोक्तुं मैत्रालयं ते देशं मुमूर्षोर् इव सोपसर्गम् ॥ ३९ ॥

5.40

संसारकान्तारपरायणस्य शिवे कथं ते पथि नारुरुक्षा ।आरोप्यमाणस्य तम् एव मार्गं भ्रष्टस्य सार्थाद् इव सार्थिकस्य ॥ ४० ॥

5.41

यः सर्वतो वेश्मनि दह्यमाने शयित मोहान् न ततो व्यपेयात् ।कालाग्निना व्याधिजराशिखेन लोके प्रदीप्ते स भवेत् प्रमत्तः ॥ ४१ ॥

5.42

प्रजीयमानश् च यथा वधाय मत्तो हसेच् च प्रलपेच् च वध्यः ।मृत्यौ तथा तिष्ठति पाशहस्ते शोच्यः प्रमाद्यन् विपरीतचेताः ॥ ४२ ॥

5.43

यदा नरेन्द्राश् च कुटुम्बिनश् च विहाय बधूंश् च परिग्रहांश् च ।ययुश् च यास्यन्ति च यान्ति चैव प्रियेष्व् अनित्येष्व् कुतोऽनुरोधः ॥ ४३ ॥

5.44

किं चिन् न पश्यामि रतस्य यत्र तद् अन्यभावेन भवेन् न दुःखम् ।तस्मात् क्व चिन् न क्षमते प्रस्क्तिर् यदि क्षमस् तद्विगमान् न शोकः ॥ ४४ ॥

5.45

तत् सौम्य लोलं परिगम्य लोकं मायोपमं चित्रम् इवेन्द्रजालम् ।प्रियाभिधान्तं तय्ज मोहजालं छेत्तुं मतिस् ते यदि दुःखजालम् ॥ ४५ ॥

5.46

वरं हितोदर्कम् अनिष्टम् अन्नं न स्वादु यत् स्याद् अहितानुबद्धम् ।यस्माद् अहं त्वा विनियोजयामि शिवे शुचौ वर्त्मनि विप्रियेऽपि ॥ ४६ ॥

5.47

बालस्य धात्री विनिगृह्य लोष्टं यथोद्धरत्य् आस्यपुटप्रविष्टम् ।तथोज्जिहीर्षुः खलु रागशल्यं तत् त्वाम् अवोचं परुषं हिताय ॥ ४७ ॥

5.48

अनिष्टम् अप्य् औषधम् आतुराय ददाति वैद्यश् च यथा निगृह्य ।तद्वन् मयोक्तं प्रतिकूलम् एतत् तुभ्यं हितोदर्कम् अनुग्रहाय ॥ ४८ ॥

5.49

तद् यावद् एव क्षत्रसंनिपातो न मृत्युर् आगच्छति यावद् एव ।यावद् वयो योगविधौ समर्थं बुद्धिं कुरु श्रेयसि तावद् एव ॥ ४९ ॥

5.50

इत्य् एवम् उक्तः स विनायकेन हितैषिना कारुणिकेन नन्दः ।कर्तास्मि सर्वं भगवन् वचस् ते तथा यथाज्ञापय्सीत्य् उवाच ॥ ५० ॥

5.51

आदाय वैदेहमुनिस् ततस् तं निनाय संश्लिष्य विचेष्टमानम् ।व्ययोजयच् चास्रुपरिप्लुताक्षं केशश्रियं छत्रनिभस्य मूर्ध्नः ॥ ५१ ॥

5.52

अथो नतं तस्य मुखं सबाष्पं प्रवास्यमानेषु शिरोरुहेषु ।वक्राग्रनालं नलिनं तडागे वर्षोदकक्लिन्नम् इवाबभासे ॥ ५२ ॥

5.53

नन्दस् ततस् तरुकषायविरक्तवासाश् चिन्तावशो नवगृहित इव द्विपेन्द्रः ।पूर्णः शशी बहुलपक्षगतः क्षपान्ते बालात्पेन परिषिक्त इवाबभासे ॥ ५३ ॥

5.54

सौन्दरनन्दे महाकाव्ये नन्दप्रव्राजनो नाम पञ्चमः सर्गः ।

6.head

षष्टः सर्गह्

6.1

ततो ह्वते भर्तरि गौरवेण प्रीतौ ह्वतायाम् अरतौ कृतायाम् ।तत्रैव हर्म्योपरि वर्तमाना न सुन्दरी सैव तदा बभासे ॥ १ ॥

6.2

सा भर्तुर् अभ्यागमनप्रतीक्षा गवाक्षम् आक्रम्य पयोधराभ्याम् ।द्वारोन्मुखी चलयोक्रका ललम्बे मुखेन तिर्यङ्नतकुण्डलेन ॥ २ ॥

6.3

विलम्भआरा चलयोक्रका सा तस्माद् विमानाद् विनता चकाशे ।तपःक्सयाद् अप्सरसां वरेव च्युतं विमानात् प्रियम् ईक्षमाणा ॥ ३ ॥

6.4

सा खेदसंस्विन्नललाटकेन निश्वासनीष्पीतविशेषकेण ।चिन्ताचलाक्षेण मुखेन तस्थौ बर्तारम् अन्यत्र विशङ्कमाना ॥ ४ ॥

6.5

ततश् चिरस्थानपर्श्रमेत्र स्थितैव पर्यङ्कतले पपात ।तिर्यक् च शिश्ये प्रविकीर्णहारा सपादुकैकार्थविलम्बपादा ॥ ५ ॥

6.6

अथात्र का चित् प्रमदा सबाष्पां तां दुःखितां द्रष्टुम् अनीप्समाना ।प्रासादसोपानतलप्रणादं चकार पद्भ्यां सहसा रुदन्ती ॥ ६ ॥

6.7

तस्याश् च सोपानतलप्रणादं श्रुतैव तूर्णं पुनर् उत्पपात ।प्रीत्या प्रसक्तैव च संजहर्ष प्रियोपयानं परिशङ्कमाना ॥ ७ ॥

6.8

सा त्रासयन्ती वलभीपुटस्थान् पारावतान् नूपुरनिस्वनेन ।सोपानकुक्षिङ् प्रससार हर्षाद् भ्रष्टं दुकूलान्तम् अचिन्तयन्ती ॥ ८ ॥

6.9

ताम् अङ्गनां प्रेक्ष्य च विप्रलब्धा निश्वस्य भूयः शयनं प्रपेदे ।विवर्णवक्रा न रराज चाशु विवर्णचन्द्रेव हिमागमे द्यौः ॥ ९ ॥

6.10

सा दुःखिता भर्तुर् अदर्शनेन कामेन कोपेन च दह्यमाना ।कृत्वा करे वक्रम् उपोपविष्टा चिन्तानदीं शोकजलां ततार ॥ १० ॥

6.11

तस्या मुखं पद्मसपत्नभूतं पाणौ स्थितङ् पल्लवरागताम्रे ।छायामयस्याम्भसि पङ्कजस्य बभौ नतं पद्मम् इवोपरिष्टात् ॥ ११ ॥

6.12

सा स्त्रीस्वभावेन विचिन्त्य तत् तद् दृष्टानुरागेऽभिमुखेऽपि पत्यौ ।धर्माश्रिते तत्त्वम् अविन्दमाना संकल्प्य तत् तद् विललाप तत् तत् ॥ १२ ॥

6.13

एष्याम्य् अनाश्यानविशेषकायां त्वयीति कृत्वा मयि तां प्रतिज्ञाम् ।कस्मान् नु हेतोर् दयितप्रतिज्ञः सोऽद्य प्रिय मे वितथप्रतिज्ञः ॥ १३ ॥

6.14

आर्यस्य साधोः करुणात्मकस्य मन्नित्यभीरोर् अतिदक्षिणस्य ।कुतो विकारोऽयम् अभूतपूर्वः स्वेनापरागेण ममापचारात् ॥ १४ ॥

6.15

रतिप्रियस्य प्रियवर्तिनो मे प्रियस्य नूनं हृदयं विरक्तम् ।तथापि रागो यदि तस्य हि स्यान् मच्चित्तरक्षी न स नागतः स्यात् ॥ १५ ॥

6.16

रूपेण भावेन च मद्विशिष्टा प्रियेण दृष्टा नियतं ततोऽन्या ।तथा हि कृत्वा मयि मोघसान्त्वं लग्नां सतीं माम् अगमद् विहाय ॥ १६ ॥

6.17

भक्तिं स बुद्धं प्रति याम् अवोचत् तस्य प्रयातुं मयि सोपदेशः ।मुनौ प्रसादो यदि तस्य हि स्यान् मृत्योर् इवोग्राद् अनृताद् बिभीयात् ॥ १७ ॥

6.18

लेकार्थम् आदर्शनम् अन्यचित्तो विभूषयन्त्य मम धारयित्वा ।बिभर्ति सोऽन्यस्य जनस्य तङ् चेन् नमोऽस्तु तस्मै चलसौहृदाय ॥ १८ ॥

6.19

नेच्छन्ति याः शोकम् अवाप्तुम् एवं श्रद्धातुम् अर्हन्ति न ता नराणाम् ।क्व चानुवृत्तिर् मयि सास्य पूर्वं त्यागः क्व चायं जनवत् क्षणेन ॥ १९ ॥

6.20

इत्य् एवमादि प्रियविप्रकुता प्रियेऽन्यद् आशङ्क्य च सा जगाद ।संभ्रान्तम् आरुह्य च तद् विमानं तां स्त्री सबाष्पा गिरम् इत्य् उवाच ॥ २० ॥

6.21

युवापि तावत् प्रियदर्शनोऽपि सौभाग्यभाग्व्याभिजनान्वितोऽपि ।यस् त्वां प्रियो नाभ्यचरत् कदा चित् तम् अन्यथा यास्यतिकातरासि ॥ २१ ॥

6.22

मा स्वामिनं स्वामिनि दोषतो गाः प्रियं प्रियार्हं प्रियकारिणं तम् ।न स त्वद् अन्यां प्रमदाम् अवैति स्वचक्रवाक्या इव चक्रवाकः ॥ २२ ॥

6.23

स तु त्वदर्थं गृहवासम् ईप्सन् जिजीविषुस् त्वत्परितोषहेतोः ।भ्रात्रा किलार्येण तथागतेन प्रव्राजितो नेत्रजलार्द्रवक्त्रः ॥ २३ ॥

6.24

श्रुत्वा ततो भर्तरि तां प्रवृत्तिं सवेपथुः सा सहसोत्पपात ।प्रगृह्य बाहू विरुराव चोच्चैर् हृदीव दिग्धाभिहता करेणुः ॥ २४ ॥

6.25

सा दोंअनारोषितरक्तदृष्टिः संतापसंक्षोभितगात्रयष्टिः ।पपात शीर्णाकुलहारयष्टिः फलातिभाराद् इव चूतयष्टिः ॥ २५ ॥

6.26

सा पद्मरागं वसनं वसाना पद्मानना पद्मदलायताक्षी ।पद्मा विपद्मा पतितेव लक्ष्मीः शुशोष पद्मस्रग् इवातपेन ॥ २६ ॥

6.27

संचिन्त्य संचिन्त्य गुणांश् च भर्तुर् दीर्घं निशशवास तताम चैव ।विभूषश्रीनिहिते प्रकोष्ठे ताम्रे कराग्रे च विनिर्दुधाव ॥ २७ ॥

6.28

न भुषणार्थो मम संप्रतीति सा दिक्षु चिक्षेप विभूषणानि ।निर्भुषणा सा पतिता चकाशे विशीर्णपुष्पस्तबका लतेव ॥ २८ ॥

6.29

धृतः प्रियेणायम् अभून् ममेति रुक्मत्सरुं दर्पणम् आलिलिङ्गे ।यत्नाच् च विन्यस्ततमालपत्त्रौ रुष्टेव धृष्टं प्रममार्ज गण्डौ ॥ २९ ॥

6.30

सा चक्रवाक्वीक भृशं चुकूज श्येनाग्रपक्षक्षतचक्रवाका ।विस्पर्धमानेव विमानसंस्तहिः पारावतैः कूजनलोकण्ठैः ॥ ३० ॥

6.31

विचित्रमृद्वास्तरणेऽपि सुप्ता वैडूर्यवज्रप्रतिमण्डितेऽपि ।रुक्माङ्गपादे शयने महार्हे न शर्म लेभे परिचेष्टमाना ॥ ३१ ॥

6.32

संदृष्य भर्तुश् च विभूषआनि वासांसि वीणाप्रभृतिंश् च लीलाः ।तमो विवेशाभिननाद चोच्चैः पङ्कावतीर्णेव च संससाद ॥ ३२ ॥

6.33

सा सुन्दरी श्वासचलोदरी हि वज्राग्निसंभिन्नदरीगुहेव ।शोकाग्निनान्तर्धृदि दह्यमाना विभ्रान्तचित्तेव तदा बभूव ॥ ३३ ॥

6.34

रुरोद मम्लौ विरुराव जग्लौ बभ्राम तस्थौ विललाप दध्यौ ।चकार रोषं विचकार माल्यं चकर्त वक्रं विचकर्ष वस्त्रम् ॥ ३४ ॥

6.35

तां चारुदन्तीं प्रसभं रुदन्तीं संश्रुत्य नार्यः परमाभितप्ताः ।अन्तर्गृहाद् आरुरुहुर् विमानं त्रासेन किंनर्य इवाद्रिपृष्ठम् ॥ ३५ ॥

6.36

बाष्पेण ताः क्लिन्नविषण्णवक्रा वर्षेण पद्मिन्य इवार्द्रपद्माः ।स्थानानुरूपेण यथाभिमानं निलिल्यिरे ताम् अनु दह्यमानाः ॥ ३६ ॥

6.37

ताभिर् वृता हर्म्यतलेऽङ्गनाभिश् चिन्तातनुः सा सुतनुर् बभासे ।शतह्रदाभिः परिवेष्टितेव शशाङ्कलेखा शरद्भ्रमध्ये ॥ ३७ ॥

6.38

या तत्र तासां वचसोपपन्ना मान्या च तस्या वयसाधिका च ।सा पृष्ठतस् तां तु समालिलिङ्गे प्रमृह्य चाश्रूणि वचांस्य् उवाच ॥ ३८ ॥

6.39

राजर्षिवध्वास् तव नानुरूपो धर्माश्रिते भर्तरि जातु शोकः ।इक्ष्वाकुवंशे ह्य् अभिकाङ्क्षितानि दायाद्यभूतानि तपोवनानि ॥ ३९ ॥

6.40

प्रायेण मोक्षाय विनिःसृतानां शाक्यर्षभाणां विदिताः स्त्रियस् ते ।तपोवनानीव गृहाणि यासां साध्वीव्रतं कामवदास्रितानाम् ॥ ४० ॥

6.41

यद्य् अन्यया रूपगुणाधिकत्वाद् भर्ता हृतस् ते कुरु बाष्पमोक्षम् ।मनस्विनी रूपवती गुणाध्या हृदि क्षते कात्र हि नाश्रु मुञ्चेत् ॥ ४१ ॥

6.42

अथापि किं चिद् व्यसनं प्रपन्नो मा चैव तद् भूत् सदृशोऽत्र बाष्पः ।अतो विशिष्टं न हि दुःखम् अस्ति कुलोद्गतायाः पतिदेवतायाः ॥ ४२ ॥

6.43

अथ त्व् इदानीं लडितः सुखेन स्वस्थः फलस्थो व्यस्नान्य् अदृष्ट्वा ।वीतस्पृहो धर्मम् अनुप्रपन्नः किं विक्लवे रोदिषि हर्षकाले ॥ ४३ ॥

6.44

इत्य् एवम् उक्तापि बहुप्रकारं स्नेहात् तया नैव धृतिं चकार ।अथापरा तां मनसोऽनुकूलं कालोपपन्नं प्रणयाद् उवाच ॥ ४४ ॥

6.45

ब्रवीमि सत्यं सुविनिश्चितं मे प्राप्तं प्रियं द्रक्ष्यसि शीघ्रम् एव ।त्वया विना स्थास्यति तत्र नासौ सत्त्वाश्रयश् चेतनयेव हीनः ॥ ४५ ॥

6.46

अङ्केऽपि लक्ष्म्या न स निर्वृतः स्यात् त्वं तस्य पार्श्वे यदि तत्र न स्याः ।आपत्सु कृच्छ्रास्व् अपि चागतासु त्वां पश्यतस् तस्य भवेन् न दुःखम् ॥ ४६ ॥

6.47

त्वं निर्वृतिं गच्छ नियच्छ बाष्पं तप्ताश्रुमोक्षात् परिरक्ष चक्षुः ।यस् तस्य भावस् त्वयि यश् च रागो न रंस्यते त्वद्विरहात् स धर्मे ॥ ४७ ॥

6.48

स्याद् अत्र नासौ कुलसत्त्वगोयात् काषायम् आदाय विहास्यतीति ।अनात्मनादाय गृहोन्मुखस्य पुनर् विमोक्तुं क इवास्ति दोषः ॥ ४८ ॥

6.49

इत्य् युवतिजनेन सान्त्व्यमाना हृतहृदया रमणेन सुन्दरी सा ।द्रमिडम् अभिमुखी पुरेव रम्भा क्षितिम् अगमत् परिवारिताप्सरोभिः ॥ ४९ ॥

6.50

सौन्दरनन्दे महाकाव्ये भार्याविलापो नाम षष्टः सर्गह् ।

7.head

सप्तमः सर्गः

7.1

लिङ्गं ततः शास्तृविधिप्रदिष्टं गात्रेण बिभ्रन् न तु चेतसा तत् ।भार्यागतैर् एव मनोवितकैर् जेह्रीयमाणो न ननन्द नन्दः ॥ १ ॥

7.2

स पुष्पमासस्य च पुष्पलक्ष्म्या सर्वाभिसारेण च पुष्पकेतोः ।यानीयभावेन च यौवनस्य विहारसंस्थो न शमं जगाम ॥ २ ॥

7.3

स्थितः स दीनः सहकारवीथ्याम् आलीनसंमूर्छितषत्पदायाम् ।भृशं जजृम्भे युगदीर्घबाहुर् ध्यात्वा प्रियां चापम् इवाचकर्ष ॥ ३ ॥

7.4

स पितक्षोदम् इव प्रतीच्छन् चूतद्रुम्भेयस् तनुपुष्पवर्षम् ।दीर्घं निशश्वास विचिन्त्य भार्यां नवग्रहो नाग इवावरुद्धः ॥ ४ ॥

7.5

शोकस्य हर्ता शरणागतानां शोकस्य कर्ता प्रतिगर्वितानाम् ।अशोकम् आलम्ब्य स जातशोकः प्रियां प्रियाशोकवनां शुशोच ॥ ५ ॥

7.6

प्रियां प्रियायाः प्रतनुं प्रियण्गुं निशाम्य भीताम् इव निष्पतन्तिम् ।सस्मार ताम् अश्रुमुखीं सबाष्पः प्रियां प्रियङ्गुप्रसवावदाताम् ॥ ६ ॥

7.7

पुष्पावनद्धे तिलकद्रुमस्य दृष्ट्वान्यपुष्टां शिखरे निविष्टाम् ।संकल्पयाम् आस शिखां प्रियायाः शुक्लांशुकेऽट्टालम् अपास्रितायाः ॥ ७ ॥

7.8

लतां प्रफुल्लाम् अतिमुक्तकस्य चूतस्य पार्श्वे परिरभ्य जाताम् ।निशाम्य चिन्ताम् अगमत् तदैवं श्लिष्टाभवन् माम् अपि सुन्दरीति ॥ ८ ॥

7.9

पुष्पोत्कराला अपि नागवृक्षा दान्तैः समुद्गैर् इव हेमगर्भैः ।कान्तारवृक्षा इव दुःखितस्य न चक्षुर् आचिक्षिपुर् अस्य तत्र ॥ ९ ॥

7.10

गन्धं वसन्तोऽपि च गन्धपर्णा गन्धर्ववेष्या इव गन्धपूर्णाः ।तस्यान्यचित्तस्य शुगात्मकस्य घ्राणं न जह्रुर् हृदयं प्रतेपुः ॥ १० ॥

7.11

संरक्तकण्ठैश् च विनीलकण्ठैस् तुष्टैः प्रहृष्टैर् अपि चान्यपुष्टैः ।लेलिह्यमानैश् च मधु द्विरेपैः स्वनद्वनं तस्य मनो नुनोद ॥ ११ ॥

7.12

स तत्र भार्यारणिसंभवेन वितर्कधूमेन तमःशिखेन ।कामाग्निनान्तर्हृदि दह्यमानो विहाय धैर्यं विललाप तत् तत् ॥ १२ ॥

7.13

अद्यावगच्छामि सुदुष्करं ते चक्रुः करिष्यन्ति च कुर्वते च ।त्यक्त्वा प्रियाम् अश्रुमुखीं तपो ये चेरुश् चरिष्यन्ति चरन्ति चैव ॥ १३ ॥

7.14

तावद् दृढं बन्धनम् अस्ति लोके न दारवं तान्तवम् आयसं वा ।यावद् दृढं बन्धनम् एतद् एव मुखं चल्श्क्षं ललितं च वाक्यम् ॥ १४ ॥

7.15

छित्त्वा च भित्त्वा च हि यान्ति तानि स्वपौरुषाच् चैव सुहृद्बलाच् च ।ज्ञानाच् च रौक्ष्याच् च विना विमोक्तुं न शक्यते स्नेहमयस् तु पाशः ॥ १५ ॥

7.16

ज्ञानं न मे तच् च शमाय यत् स्यान् न चास्ति रौक्ष्यं करुणात्मकोऽस्मि ।कामात्मकश् चास्मि गुरुश् च बुद्धः स्थितोऽन्तरे चक्रगतेर् इवास्मि ॥ १६ ॥

7.17

अहं गृहीत्वापि हि भिक्षुलिङ्गं भ्रातृषिणा द्विर्गुरुणानुशिष्टः ।सर्वास्व् अवस्थासु लभे न शान्तिं प्रियावियोगाद् इव चक्रवाकः ॥ १७ ॥

7.18

अद्यापि तन् मे हृदि वर्तते च यद् दर्पणे व्याकुलिते मया सा ।कृतानृतक्रोधकम् अब्रवीन् मां कथं कृतोऽसीति शठं हसन्ती ॥ १८ ॥

7.19

यथैष्य् अनाश्यानविशेषकायां मयीति यन् माम् अवदच् च साश्रु ।पारिप्लवाक्षेण मुखेन बाला तन् मे वचोऽद्यापि मनो रुणद्धि ॥ १९ ॥

7.20

बद्ध्वासनं पर्वतनिर्झरस्थः स्वस्थो यथा ध्यायति भिक्षुर् एषः ।सक्तः क्व चिन् नाहम् इवैष नूनं शान्तस् तथा तृप्त इवोपविष्टः ॥ २० ॥

7.21

पुंस्कोकिलानाम् अविचिन्त्य घोषं वसन्तलक्ष्म्याम् अविचार्य चक्षुः ।शास्त्रं यथाभ्यस्यति चैष युक्तः शङ्के प्रियाकर्षति नास्य चेतः ॥ २१ ॥

7.22

अस्मै नमोऽस्तु स्थिरनिश्चयाय निवृत्तकौतूहलविस्मयाय ।शान्तात्मनेऽन्तर्गतमानसाय चङ्क्रम्यमाणाय निरुत्सुकाय ॥ २२ ॥

7.23

निरीक्षमाणाय जलं सपद्मं वनं च फुल्लं परपुष्टजुष्टम् ।कस्यास्ति धैर्यं नवयौवनस्य मासे मधौ धर्मसपत्नभूते ॥ २३ ॥

7.24

भावेन गर्वेण गतेन लक्ष्म्या स्मितेन कोपेन मदेन वाग्भिः ।जह्रुः स्त्रियो देवनृपर्षिसंघान् कस्माद् धि नास्मद्विधम् आषिपेयुः ॥ २४ ॥

7.25

कामाभिभूतो हि हिरण्यरेताः स्वाहां सिषेवे मघवान् अहल्याम् ।सत्त्वेन सर्गेञ च तेन हीनः स्त्रीनिर्जितः किं बत मानुषोऽहम् ॥ २५ ॥

7.26

सूर्यः सरण्यूं प्रति जातरागस् तत्प्रीतये तष्ट इति श्रुतं नः ।याम् अश्वभूतोऽश्ववधुं समेत्य यतोऽश्विनौ तौ जनयां बभूव ॥ २६ ॥

7.27

स्त्रीकारणं वैरविषक्तबुद्ध्योर् वैवस्वताग्न्योश् चलितात्मधृत्योः ।बहूनि वर्षाणि बभूव युद्धं कः स्त्रीनिमित्तं न चलेद् इहान्यः ॥ २७ ॥

7.28

भेजे श्वपाकीं मुनिर् अक्षमालां कामाद् वैष्ठश् च स सद्वरिष्टः ।यस्यां विवस्वान् इव भूजलादः सुतः प्रसूतोऽस्य कपिञ्जलादः ॥ २८ ॥

7.29

पराशः शापशरस् तहर्षिः कालीं सिषेवे झषगर्भयोनिम् ।सुतोऽस्य यस्यां सुषुवे महात्मा द्वैपायनो वेदविभागकर्ता ॥ २९ ॥

7.30

द्वैपायनो धर्मपरायञश् च रेमे समं काशिषु वेश्यवध्व ।यया हतोऽभूच् चलनूपुरेञ पादेन विद्युल्लतयेव मेघः ॥ ३० ॥

7.31

तथाञ्गिरा रागपरीतचेताः सरस्वतीं ब्रह्मसुतः सिषेवे ।सारस्वतो यत्र सुतोऽस्य जज्ञे नष्टस्य वेदस्य पुनःप्रवक्ता ॥ ३१ ॥

7.32

तथा नृपर्षेर् दिलिपस्य यज्ञे स्वर्गस्त्रियां काश्यप आगतास्थः ।स्रुचं गृहीत्वा स्रवद् आत्मतेजश् चिक्षेप वह्नाव् असितो यतोऽभूत् ॥ ३२ ॥

7.33

तथाङ्गदोऽन्तं तपसोऽपि गत्वा कामाभिभूतो यमुनाम् अगच्छत् ।धीमत्तरं यत्र रहीतरं स सारङ्गजुष्टं जनयां बभूव ॥ ३३ ॥

7.34

निशाम्य शान्तां नरदेवकन्यां वनेऽपि शान्तेऽपि च वर्तमानः ।चचाल धैर्यान् मुनिर् ऋष्यषृङ्गः शैलो महीकम्प इवोच्चशृङ्गः ॥ ३४ ॥

7.35

ब्रह्मर्षिभावार्थम् अपास्य राज्यं भेजे वनं यो विषयेष्व् अनास्थः ।स गाधिजश् चापहृतो घृताच्या समा दशैकं दिवसं विवेद ॥ ३५ ॥

7.36

तथैव कन्दर्पशराभिमृष्टो रम्भां प्रति स्तुःइलशिरा मुमूर्छ ।यः कामरोषात्मतयानपेक्षः शशाप ताम् अप्रतिगृह्यमाणः ॥ ३६ ॥

7.37

प्रमद्वरायां च रुरुः प्रियायां भुजङ्गमेनापहृतेन्द्रियायाम् ।संदृश्य संदृश्य जघान सर्पान् प्रियं न रोषेण तपो ररक्ष ॥ ३७ ॥

7.38

नप्ता शशाङ्कस्य यशोगुणाङ्को बुधस्य सूनुर् विभुधप्रभावः ।तथोर्वशीम् अप्सरसं विचिन्त्य राजर्षिर् उन्मादम् अगच्छद् ऐडः ॥ ३८ ॥

7.39

रक्तो गिरेर् मूर्धनि मेनकायां कामात्मकत्वाच् च स ताल्जङ्घः ।पादेन विश्वावसुना सरोषं वज्रेण हिन्ताल इवाभिजघ्ने ॥ ३९ ॥

7.40

नाशं गतायां परमाङ्गनायां गङ्गाजलेऽनङ्गपरीतचेताः ।जह्नुश् च गङ्गां नृपतिर् भुजाभ्यां रुरोध मैनाक इवाचलेन्द्रः ॥ ४० ॥

7.41

नृपश् च गङ्गाविरहाज् जुघूर्ण गङ्गाम्भसा साल इवात्तमूलः ।कुलप्रदीपः प्रतिपस्य सूनुः श्रीमत्तनुः शन्तनुर् अस्वतन्त्रः ॥ ४१ ॥

7.42

हृतां च सौनन्दकिनानुशोचन् प्राप्ताम् इन्वोर्वी स्त्रियम् उर्वशीं ताम् ।सद्वृत्तवर्मा किल सोमवर्मा बभ्राम चित्तोधवभिन्नवर्मा ॥ ४२ ॥

7.43

भार्यां मृतां चानुममार राजा भीमप्रभावो भुवि भीमकः सः ।बलेन सेनाक इति प्रकाशः सेनापतिर् देव इवात्तसेनः ॥ ४३ ॥

7.44

स्वर्गं गते भर्तरि शन्तनौ च कालीं जिहिर्षन् जनमेजयः सः ।अवाप भीष्मात् समवेत्य मृत्युं न तद्गतं मन्म्हथम् उत्ससर्जे ॥ ४४ ॥

7.45

शप्तश् च पाण्डुर् मदनेन नूनं स्त्रीणां वशं कामवशेन जग्मुः ।जगाम माद्रीं न महर्षिशापाद् असेव्यसेवी विममर्श मृत्युम् ॥ ४५ ॥

7.46

एवंविधा देवनृपर्षिसङ्घः स्त्रीणां वशं कामवशेन जग्मुः ।धिया च सारेण च दुर्बलः सन् प्रियाम् अपश्यन् किमु विक्लवोऽहम् ॥ ४६ ॥

7.47

यास्यामि तस्माद् गृहम् एव भूयः कामं करिष्ये विधिवत् सकामम् ।न ह्य् अन्यचित्तस्य चलेन्द्रियस्य लिङ्गं क्षमं धर्मपथाच् च्युतस्य ॥ ४७ ॥

7.48

पाणौ कपालम् अवधाय विधाय मौण्ड्यं मान निधाय विकृतं परिधाय वासः ।यस्योयोद्धवो न धृतिर् अस्ति न शान्ति अस्ति चित्रप्रदीप इव सोऽस्ति च नास्ति चैव ॥ ४८ ॥

7.49

यो निःसृतश् च न च निःसृतकामरागः काषायम् उद्वहति यो न च निष्कसायः ।पात्रं बिभर्ति च गुणैर् न च पात्रभूतो किङ्गं वहन्न् अपि स नैव गृही न भिक्षुः ॥ ४९ ॥

7.50

न न्याय्यम् अन्वयवतः परिगृह्य लिङ्गं भूयो विमोक्तुम् इति योऽपि हि मे विचारः ।सोऽपि प्रणश्यति विचिन्त्य नृपप्रवीरांस् तान् ये तपोवनं अपास्य गृहाण्य् अतीयुः ॥ ५० ॥

7.51

शाल्वाधिपो हि ससुतोऽपि तथाम्बरीषो रामोऽन्ध्व एव स च सांकृतिर् अन्तिदेवः ।चीराण्य् अपास्य दधिरे पुनर् अंशुकानि छित्त्वा जटाष् च कुटिला मुकुटानि बभ्रुः ॥ ५१ ॥

7.52

तस्माद् भिक्षार्थं मम गुरुर् इतो यावद् एव प्रयातस् त्यक्त्वा काषायं गृहम् अहम् इतस् तावद् एव प्रयास्ये ।पूज्यं लिङ्गं हि स्कलितमनसो बिभ्रतः क्लिष्टबुद्धेर् नामुत्रार्थः स्याद् उपहतमतेर् नाप्य् अयं जीवलोकः ॥ ५२ ॥

7.53

सौन्दरनन्द महाकाव्ये नन्दिव्लापो नाम सप्तमः सर्गः ।

8.head

अष्टमः सर्गः

8.1

अथ नन्दम् अधीरलोचनं गृहयानोत्सुकम् उत्सुकोतुस्कम् ।अभिगम्य शिवेन चक्षुषा श्रमणः कश् चिद् उवाच मैत्रया ॥ १ ॥

8.2

किम् इदं मुखम् अश्रुदुरिनं हृदयस्थं विवृणोति ते तमः ।धृतिम् एहि नियच्छ विक्रियां न हि बाष्पश् च शमश् च शोभते ॥ २ ॥

8.3

द्विविधा समुदेति वेदना नियतं चेतसि देह एव च ।श्रुतविध्युपचारकोविदा द्विविधा एव तयोश् चिकित्सकाः ॥ ३ ॥

8.4

तद् इयं यदि कायिकी रुजा भिषजे तूर्णम् अनूनम् उच्यताम् ।विनिगुह्य हि रोगम् आतुरो नचिरात् तीव्रम् अनर्थम् ऋच्छति ॥ ४ ॥

8.5

अथ दुःखम् इदं मनोमयं वद वक्ष्यामि यद् अत्र भेषजम् ।मनसो हि रजस्तमस्विनो भिषजोऽध्यात्मविदः परीक्षकाः ॥ ५ ॥

8.6

निखिलेन च सत्यम् उच्यतां यदि वाच्यं मयि सौम्य मन्यस्ते ।गतयो विविधा हि चेतसां बहुगुह्यानि मदाकुलानि च ॥ ६ ॥

8.7

इति तेन स चोदितस् तदा व्यवसायं प्रविवक्षुर् आत्मनः ।अवलम्ब्य करे करेण तं प्रविवक्षुर् आत्मनः ॥ ७ ॥

8.8

अथ तत्र शुचौ लतागृहे कुसुमोद्गारिणि तौ निषेदतुः ।मृदुभिर् मृदुमारुतेरितैर् उपगूधाव् इव बालपल्लवैः ॥ ८ ॥

8.9

स जगाद ततश् चिकीषितम् घननिश्वासगृहीतम् अन्तरा ।श्रुतवाग्विशदाय भिक्षवे विदुषा प्रव्रजितेन दुर्वचम् ॥ ९ ॥

8.10

सदृशं यदि धर्मचारिणः सततं प्राणिषु मैत्रचेतसः ।अधृतौ यद् इयं हितैषिता मयि ते स्यात् करुणात्मनः सतः ॥ १० ॥

8.11

अत एव च मे विशेषतः प्रविवक्षा क्षमवादिनि त्वयि ।न हि भावम् इमं चलात्मने कथयेयं ब्रुवतेऽप्य् असाधवे ॥ ११ ॥

8.12

तद् इदं शृणु मे समासतो न रमे धरविधाव् ऋते प्रियाम् ।गिरिसानुषु कामिनीम् ऋते कृतरेता इव किंनरश् चरन् ॥ १२ ॥

8.13

वनवाससुखात् पराङ्मुखः प्रयियासा गृहम् एव येन मे ।न हि शर्म लभे तया विना नृपतिर् हीन इवोत्तमश्रिया ॥ १३ ॥

8.14

अथ तस्य निशम्य तद्वचः प्रियभार्याभिमुखस्य शोचतः ।श्रमणः स शिरः प्रकम्पयन् निजगादात्मगतं शनैर् इदम् ॥ १४ ॥

8.15

कृपणं बत यूथलालसो महतो व्याधभयाद् विनिःसृतः ।प्रविविक्षति वागुरां मृगश् चपलो गीतरवेण वञ्चितः ॥ १५ ॥

8.16

विहगः खलु जालसंवृतो हितकामेन जनेन मोक्षितः ।विचरन् फलपुष्पवद्वनं प्रविविक्षुः स्वयम् एव पञ्जरम् ॥ १६ ॥

8.17

कलभः करिणा खलूद्धृतो बहुपङ्काद् विषमान् नदीतलात् ।जलतर्षवशेन तां पुनः सरितं ग्राहवती तितीर्षति ॥ १७ ॥

8.18

शरणे सभुजङ्गमे स्वपन् प्रतिबुद्धेन परेञ बोधितः ।तरुणः खलु जातविभ्रमः स्वयम् उग्रं भुजगं जिघृक्षति ॥ १८ ॥

8.19

महता खलु जातवेदसा ज्वलिताद् उत्पतितो वनद्रुमात् ।पुनर् इच्छति नीडतृष्णया पतितुं तत्र गतव्यथो द्विजः ॥ १९ ॥

8.20

अवशः खलु काममूर्छया प्रियया श्येनभयाद् विनाकृतः ।न धृतिं समुपैति न ह्रियं करुणं जीवति जीवजीवकः ॥ २० ॥

8.21

अकृतात्मतया तृषान्वितो घृणया चैव धिया च वर्जितः ।अशनं खलु वान्तम् आत्मना कृपणः श्वा पुनर् अत्तुम् इच्छति ॥ २१ ॥

8.22

इति मन्मथशोककर्षितं तम् अनुध्याय मुहुर् निरीक्ष्य च ।श्रमणः स हिताभिकाङ्क्षया गुणवद्वाक्यम् उवाच विप्रियम् ॥ २२ ॥

8.23

अविचारयतः शुभाशुभं विषयेष्व् एव निविष्टचेतसः ।उपपन्नम् अलब्धचकुसुषो न रतिः श्रेयसि चेद् भवेत् तव ॥ २३ ॥

8.24

श्रवणे ग्रहणेऽथ धारणे परमार्थावगमे मनःशमे ।अविषक्तमतेश् चलात्मनो न हि धर्मेऽभिरतिर् विधीयते ॥ २४ ॥

8.25

विषयेषु तु दोषदर्शिनः परितुष्टस्य शुचेर् अमानिनः ।शमकर्मसु युक्तचेतसः कृतबुद्धेर् न रतिर् न विद्यते ॥ २५ ॥

8.26

रमते तृषितो धनश्रिया रमते कामसुखेन् बालिशः ।रमते प्रशमेन सज्जनः परिभोगान् परिभूय विद्यया ॥ २६ ॥

8.27

अपि च प्रथितस्य धीमतः कुलजस्यार्चितलिङ्गधारिणः ।सदृशी न गृहाय चेतना प्रणतिर् वायुवशाद् गिरेर् इव ॥ २७ ॥

8.28

स्पृह्येत् परसंश्रिताय यः परिभूयात्मवशां स्वतन्त्रताम् ।उपशान्तिपथे शिवे स्थितः स्पृहयेद् दोषवते गृहाय सः ॥ २८ ॥

8.29

व्यसनाभिहतो यथा विशेत् पर्मुक्तः पुनर् एव बन्धनम् ।समुपेत्य वनं तथा पुनर् गृहसंज्ञं मृगयेत बन्धनम् ॥ २९ ॥

8.30

पुरुषश् च विहाय यः कलिं पुनर् इच्छेत् कलिम् एव सेवितुम् ।स विहाय भजेत बालिषः कलिभूताम् अजितेन्द्रियः प्रियाम् ॥ ३० ॥

8.31

सविषा इव संश्रिता लताः परिमृष्टा इव सोरगा गुहाः ।विवृता इव चासयो धृता व्यसनान्ता हि भवन्ति योषितः ॥ ३१ ॥

8.32

प्रमदाः समदा मदप्रदाः प्रमदा वीतमदा भयप्रदाः ।इति दोषभयावहाश् च ताः कथम् अर्हन्ति निषेवनं नु ताः ॥ ३२ ॥

8.33

स्वजनः स्वजनेन भिद्यते सुहृदश् चापि सुहृज्जनेन यत् ।परदोषविक्षणाः शठास् तदनार्याः प्रचरन्ति योषितः ॥ ३३ ॥

8.34

कुलजाः कृपणीभवन्ति यद् यद् अयुक्तं प्रचरन्ति साहसम् ।प्रविशन्ति च यच् चमूमुखं रभसास् तत्र निमित्तम् अङ्गनाः ॥ ३४ ॥

8.35

वचनेन हरनति वल्गुना निशितेन प्रहरन्ति चेतसा ।मधु तिष्ठति वाचि योषितां हृदये हालहलं महद्विषम् ॥ ३५ ॥

8.36

प्रदहन् दहनोऽपि गृह्यते विशरीरः पवनोऽपि गृह्यते ।कुपितो भुजगोऽपि गृह्यते प्रदानां तु मनो न गृह्यते ॥ ३६ ॥

8.37

न वपुर् विमृशन्ति न श्रियं न मतिं नापि कुलं न विक्रमम् ।प्रहरन्त्य् अविशेषतः स्त्रियः सरितो ग्राहकुलाकुला इव ॥ ३७ ॥

8.38

न वचो मधुरं न लालनं स्मरति स्त्री न च सुअह्रदं क्व चित् ।कलिता वनितैव चञ्चला तद् इहारिष्व् इव नावलम्ब्यते ॥ ३८ ॥

8.39

अददत्सु भवन्ति नर्मदाः प्रददत्सु प्रविशन्ति विभ्रमम् ।प्रणतेषु भवन्ति गर्विताः प्रमदास् तृप्ततराश् च मानिषु ॥ ३९ ॥

8.40

गुणवत्सु चरन्ति भर्तृवद् गुणहीनेषु चरन्ति पुत्रवत् ।धनवत्सु चरन्ति तृष्णया धनहीनेषु चरन्त्य् अवज्ञया ॥ ४० ॥

8.41

विषयाद् विषयान्तरं गता प्रचरत्य् एव यथा हृतापि गौः ।अनवेक्षितपूर्वसौहृदा रमतेऽन्यत्र गता तथाङ्गना ॥ ४१ ॥

8.42

प्रविशन्त्य् अपि हि स्त्रियश् चिताम् अनुभध्नन्त्य् अपि मुक्तजीव्ताः ।अपि बिभ्रति नैव यन्त्रणा न तु भावेन वहन्ति साहृदम् ॥ ४२ ॥

8.43

रमयन्ति पतीन् कथं चन प्रमदा याः पतिदेवताः क्व चित् ।चलचित्ततया सहस्रशो रमयन्ते हृदयं स्वन् एव ताः ॥ ४३ ॥

8.44

श्वपचं किल सेनजित्सुता चकमे मीनरिपुं कुमुद्वती ।मृगराजम् अथो बृहद्रथा प्रमदानाम् अगतिर् न विद्यते ॥ ४४ ॥

8.45

कुरुहैहयवृष्णिवंशजा बहुमायाकवचोऽथ शम्बरः ।मुनिर् उग्रतपाश् च गौतमः समवापुर् वनितोद्धतं रजः ॥ ४५ ॥

8.46

अकृतज्ञम् अनार्यम् अस्थिरं वनितानाम् इद ईदृशं मनः ।कथम् अर्हति तासु पण्डितो हृदयं सञ्जयितुं चलात्मसु ॥ ४६ ॥

8.47

अथ सूक्ष्ममति द्वयाशिवं लघु तासां हृदयं न पश्यसि ।किमु कायम् असद्गृहं स्रवद् वैन्तानाम् अशुचिं न पश्यसि ॥ ४७ ॥

8.48

यद् अहन्य् अहनि प्रधावनैर् वसनैश् चाभरणैश् च संस्कृतम् ।अशुभं तमसावृतेक्षणः शुभतो गच्छसि नावगच्छसि ॥ ४८ ॥

8.49

अथ वा समवैषि तत्तनूम् अशुभां त्वं न तु संविद् अस्ति ते ।सुरभिं विदधासि हि क्रियाम् अशुचेस् तत्प्रभवस्य शान्तये ॥ ४९ ॥

8.50

मलपञ्कधरा दिगम्बरा प्रकृतिस्थैर् नखदन्तरोमभिः ।यदि साधु किम् अत्र योषितां सहजं तासु विचीयतां शुचि ॥ ५० ॥

8.51

मलपङ्कधरा दिगम्बरा प्रकृतिस्थैर् नखदन्तरोमभिः ।यदि सा तव सुन्दरी भवेन् नियतं तेऽद्य न सुन्दरी भवेत् ॥ ५१ ॥

8.52

स्रवतीम् अशुचिं स्पृशेच् च कः सघुणो जर्जरभाण्डवत् स्त्रियम् ।यदि केवलया त्वचावृता न भवेन् मक्षिकपत्त्रमात्रया ॥ ५२ ॥

8.53

त्वचवेष्ठितम् अस्तिपञ्जरं यदि कायं समवैषि योषिताम् ।मदनेन च कृष्यसे बलाद् अघृणः कायं सम्वैषि योषिताम् ॥ ५३ ॥

8.54

शुभताम् अशुभेषु कल्पयन् नखदन्तत्वचकेशरोमसु ।अविचक्षण किं न पश्यसि प्रकृतिं च प्रभवं च योषिताम् ॥ ५४ ॥

8.55

तद् अवेत्य मनःशरीरयोर् वनिता दोषवतीर् विशेषतः ।चपलं भवनोत्सुकं मनः प्रतिसंख्यानबलेन वार्यताम् ॥ ५५ ॥

8.56

श्रुतवान् मतिमान् कुलोद्गतः परमस्य प्रशमस्य भाजनम् ।उपगम्य यथा तथा पुनर् न हि बेत्त्तुं नियमं त्वम् अर्हसि ॥ ५६ ॥

8.57

अभिजनमहतो मनस्विनः प्रिययशसो बहुमानम् इच्छतः ।निधनम् अपि वरं स्थिरात्मनश् च्युतविनयस्य न चैव जीवितम् ॥ ५७ ॥

8.58

बद्ध्वा यथा हि कवचं प्रगृहीतचापो निन्द्यो भवत्य् अपसृतः समराद् रथस्थः ।भैक्षाकम् अभ्युपगतः परिगृह्य लिङ्गं निन्द्यस् तथा भवति कामहृतेन्द्रियाश्वः ॥ ५८ ॥

8.59

हास्यो यथा च परमाभरणाम्बरस्रग् भैक्षं चरन् धृतधनुश् चलचित्रमौलिः ।वैरूप्यम् अभ्युपगतः परैण्डभोजी हास्यस् तथा गृहसुखाभिमुखः सतृष्णः ॥ ५९ ॥

8.60

यथा स्वन्नं भुक्त्वा परमशयनीयेऽपि शयितो वराहो निर्मुक्तः पुनर् अशुचि धावेत् परिचितम् ।तथा श्रेयः शृण्वन् प्रशमसुखम् आस्वाद्य गुणवद् वनं शान्तं हित्वा गृहम् अभिलषेत् कामतृषितः ॥ ६० ॥

8.61

यथोल्का हस्तस्था दहति पवनप्रेरितशिखा यथा पादाक्रान्तो दशति भुजगः क्रोधरभसः ।यथा हन्ति व्याघ्रः शिशुर् अपि गृहीतो गृहगतः तथा स्त्रीसंसर्गो भुविधम् अनर्थाय भवति ॥ ६१ ॥

8.62

तद् विज्ञाय मनःशरीरनियतान् नारिषु दोषान् इमान् मत्वा कामसुखं नदीजलचलं क्लेशाय शोकाय च ।दृष्ट्वा दुर्बलम् आमपत्रसदृशं मृत्यूपसृष्टं जगन् निर्मोक्षाय कुरुष्व बुद्धिम् अतुलाम् उत्कण्ठितुं नार्हसि ॥ ६२ ॥

8.63

सुन्दरनन्दे महाकाव्ये स्त्रीविघातो नामाष्टमः सर्गः ।

9.head

नवमः सर्गः

9.1

अथैवम् उक्तोऽपि स तेन भिषुणा जगाम नैवोपशमं प्रियां प्रति ।तथा हि ताम् एव तदा स चिन्तयन् न तस्य शुश्राव विसंज्ञवद् वचः ॥ १ ॥

9.2

यथा हि वैद्यस्य चिकीर्षतः शिवं वचो न गृह्णाति मुमूर्षुर् आतुरः ।तथैव मत्तो बलरूपयौवनैर् हितं न जग्राध स तस्य तद्वचः ॥ २ ॥

9.3

न चात्र चित्रं यदि रागपाप्मना मनोऽभिभूयेत तमोवृतामनः ।नरस्य पाप्मा हि तदा निवर्तते यदा भवत्य् अन्तगतं तमस् तनु ॥ ३ ॥

9.4

ततस् तथाक्षिप्तम् अवेक्ष्य तं तदा बलेन रूपेण च यौवनेन च ।गृहप्रयाणं प्रति च व्यवस्थितं शशास नन्दं श्रमणः स शन्तये ॥ ४ ॥

9.5

बलं च रूपं च नवं च यौवनं तथावगच्छामि यथावगच्छसि ।अहं इव् इदं ते त्रयम् अव्यवस्तितं यथावबुद्धो न तथावबुध्यसे ॥ ५ ॥

9.6

इदं हि रोगायतनं जरावशं नदीतटानोकहवच् चलाचलम् ।न वेत्सि देहं जलफेनदुर्बलं बलस्थताम् आत्मनि येन मन्यसे ॥ ६ ॥

9.7

यदान्नपानासनयानकर्मणाम् असेवनाद् अप्य् अतिसेवनाद् अपि ।शरीरम् आसन्नविपत्ति दृश्यते बलेऽभिमानस् तव केन हेतुना ॥ ७ ॥

9.8

हिमातपव्याधिजराक्षुदादिभिर् यदाप्य् अनर्थैर् उपमीयते जगत् ।जलं शुचौ मास इवार्करश्मिभिः क्षयं व्रजन् किं बलदृप्त मन्यसे ॥ ८ ॥

9.9

त्वगस्थिमांसक्षतजात्मकं यद शरीरम् आहारवशेन तिष्ठति ।अजस्रम् आर्तं सततप्रतिक्रियं बलान्वितोऽस्मीति कथं विहन्यसे ॥ ९ ॥

9.10

यथा घटं मृन्मयम् आमम् आश्रितो नरस् तितीर्षेत् क्षुभितं महार्णवम् ।समुच्छ्र्यं तद्वद् असारम् उद्वहन् बलं व्यवस्येद् विषयार्थम् उद्यतः ॥ १० ॥

9.11

शरिरम् आमाद् अपि मृन्मयम् आमम् आश्रितो नरस् तितीर्षेत् क्षुभितं महार्णवम् ।चित्रं हि तिष्ठेद् विधिवद्धृतो घटाद् इदं नु निःसारत्मं मतं मम ॥ ११ ॥

9.12

यदाम्बुभूवाय्वनलाश् च धातवः सदा विरुद्धा विषमा इवोरगाः ।भवन्त्य् अनर्थाय शरीरम् आश्रिताः कथं बलं रोगविधो व्यवस्यसि ॥ १२ ॥

9.13

प्रायन्ति मन्त्रैः प्रशमं भुजङ्गमा न मन्त्रसाध्यास् तु भवन्ति धातवः ।क्व चिच् च किं चिच् च दशन्ति पन्नगाः सदा च सर्वं च तुदन्ति धातवः ॥ १३ ॥

9.14

इदं हि शय्यासनपानभोजनैर् गुणैः शरिरं चिरम् अप्य् अवेक्षितम् ।न मर्षयत्य् एकम् अपि व्यितिक्रमं यतो महाशिविषवत् प्रकुप्यति ॥ १४ ॥

9.15

यदा हिमार्तो ज्वलनं निषेवते हिमं निदाघाभिहतोऽभिकाङ्क्षति ।क्षुधान्वितोऽन्नं सलिलं तृषान्वितो बलं कुतः किं च कथं च कस्य च ॥ १५ ॥

9.16

तद् एवम् अज्ञाय शरीरम् आतुरं बलान्वितोऽस्मीति न मन्तुम् अर्हसि ।असारम् अस्वन्तम् अनिश्चितं जगज् जगत्य् अनित्ये बलम् अव्यवस्थितम् ॥ १६ ॥

9.17

क्व कार्तवीर्यस्य बलाभिमानिनः स्हस्रबाहोर् बलम् अर्जुनस्य तत् ।चकर्त बाहून् युधि यस्य भार्गवो महान्ति शृङ्गाण्य् अशनिर् गिरेर् इव ॥ १७ ॥

9.18

क्व तद्बलं कंसविकर्षिणो हरेस् तुरङ्गराजस्य पुटावभेदिनः ।यम् एकबाणेन निजघिन्वान् जराः क्रमागता रूपम् इवोत्तमं जरा ॥ १८ ॥

9.19

दितेः सुतस्यामररोषकारिणश् चमूरुचेर् वा नमुचेः क्व तद्बलम् ।यम् आहवे क्रुद्धम् इवान्तकं स्थितं जघान फेनावयवेन वासवः ॥ १९ ॥

9.20

बलं कुरूणां क्व च तत् तदाभवद् युधि ज्वलित्वा तरसौजसा च ये ।समित्सम्मिधा ज्वलना इवाध्वरे हतासवो भस्मनि पर्यवस्थिताः ॥ २० ॥

9.21

अतो विदित्वा बल्वीर्यमानिनां बलान्वितानाम् अवमर्दितं बलम् ।जगज् जरामृत्युवशं विचारयन् बलेऽभिमानं न विधातुम् अर्हसि ॥ २१ ॥

9.22

बलं महद् वा यदि वा न मन्यसे कुरुष्व युद्धं सह तावद् इन्द्रियैः ।जयश् च तेऽत्रास्ति महच् च ते बलं पराजयश् चेद् वितथं च ते बलम् ॥ २२ ॥

9.23

तथा हि वीराः पुरुषा न ते मता जयन्ति ये साश्वरथद्विपानरीन् ।यथा मता वीरतरा मनीषिणो जयन्ति लोलानि षडिन्द्रियाणि ये ॥ २३ ॥

9.24

अहं वपुष्मान् इति यच् च मन्यसे विचक्षणं नैतद् इदं च गृह्यताम् ।क्व तद् वपुः सा च वपुष्मती तनुर् गदस्य साम्यस्य च सारणस्य च ॥ २४ ॥

9.25

यथा मयूरश् चलचित्रचन्द्रको बिभर्ति रूपं गुणवत् स्वभावतः ।शरीरसंस्कारगुणाद् ऋते तथा बिभर्षि रूपं यदि रूपवान् असि ॥ २५ ॥

9.26

यदि प्रतीपं वृणुयान् न वाससा न शौचकाले यदि संस्पृशेद् अपः ।मृजाविशेषं यदि नाददीत वा वपुर् वपुष्मन् वद कीदृशं भवेत् ॥ २६ ॥

9.27

नवं वयश् चात्मगतं निशाम्य यद् गृहोन्मुखं ते विषयाप्तये मनः ।नियच्छ तच् छैलनदीरयोपमं द्रुतं हि गच्छत्य् अनिवरति यौवनम् ॥ २७ ॥

9.28

ऋतुर् व्यतीतः परिवर्तते पुनः क्षयङ् प्रयातः पुनर् एति चन्द्रमाः ।गतं गतं नैव तु संनिवर्तते जलं नदीनां च नृणां च यौवनम् ॥ २८ ॥

9.29

विवर्णितश्मश्रु वलीविकुञ्चितं विशीर्णदन्तं शिथिलभ्रु निष्प्रभम् ।यदा मुखं द्रक्ष्यसि जर्जरं तदा जराभिभूतो विमदो भविष्यसि ॥ २९ ॥

9.30

निषेव्य पानं मदनीयम् उत्तमं निशाविवासेषु चिराद् विमाद्यति ।नरस् तु मत्तो बलरूपयौवनैर् न कश् चिद् अप्राप्य जरां विमाद्यति ॥ ३० ॥

9.31

यथेक्षुर् अत्यन्तरसप्रपीडितो भुवि प्रविद्धो दहनाय शुष्यते ।तथा जरायन्त्रनिईडिता तनुर् निपीतसारा मरणाय तिष्ठति ॥ ३१ ॥

9.32

यथा हि नृभ्यां करपत्त्रम् ईरितं समुच्छ्रितं दारु भिनत्त्य् अनेकधा ।तथोच्छ्रितां पातयति प्रजाम् इमाम् अहर्निशाभ्याम् उपसंहिता जरा ॥ ३२ ॥

9.33

स्मृतेः प्रमोषो वपुषः पराभवो रतेः क्षयो वाच्छ्रुतिचक्षुषां ग्रहः ।श्रमस्य योनिर् बल्वीर्ययोर् वधो जरासमो नास्ति शरीरिणां रिपुः ॥ ३३ ॥

9.34

इदं विदित्वा निधनस्य दैशिकं जराभिदहानं जगतो महद्भयम् ।अहं वपुष्मान् बलवान् युवेति वा न मानम् आरोढुम् अनार्यम् अर्हसि ॥ ३४ ॥

9.35

अहं ममेत्य् एव च रक्तचेतसां शरीरसंज्ञा तव यः कलौ ग्रहः ।तम् उत्सृजैवं यदि शाम्यता भवेद् भयं ह्य् अहं चेति ममेति चार्छति ॥ ३५ ॥

9.36

यदा शरीरे न वशोऽस्ति कस्य चिन् निरस्यमाने विविधैर् उपप्लवैः ।कथं क्षमं वेत्तुम् अहं ममेति वा शरीरसंज्ञं गृहम् आपदाम् इदम् ॥ ३६ ॥

9.37

सपन्नगे यः कुगृहे सदाशुचौ रमेत नित्यं प्रतिसंस्कृतेऽबले ।स दुष्टधाताव् अशुचौ चलाचले रमेत काये विपरीत्दर्शनः ॥ ३७ ॥

9.38

यथा प्ररोहन्ति तृणान्य् अयत्नतः क्षितौ प्रयत्नात् तु भन्ति शालयः ।तथैव दुःखानि तृञान्य् अयत्नतः क्षितौ प्र्यत्नात् तु भवन्ति वा न वा ॥ ३९ ॥

9.39

शरीरम् आर्तं परिकर्षतश् चलं न चास्ति किं चित् परमार्थतः सुखम् ।सुखं हि दुःखप्रतिकारसेवया स्थिते च दुःखे तनुनि व्यस्वस्यति ॥ ४० ॥

9.40

यथानपेक्ष्याग्र्यम् अपीसितं सुखं प्रबाधते दुःखम् उपेतम् अण्व् अपि ।तथानपेक्ष्यात्मनि दुःखम् आगतं न विद्यते किं चन कस्य चित् सुखम् ॥ ४१ ॥

9.41

शरीरम् ईदृग्भहुदुःखम् अध्रुवं फलानुरोधाह् अथ नावगच्छसि ।द्रवत् फलेभ्यो धृतिरश्मिभिर् मनो निगृह्यतां गौर् इव शस्यलालसा ॥ ४२ ॥

9.42

न कामभोगा हि भवन्ति तृप्तये हवींषि दीप्तस्य विभावसोर् इव ।यथा यथा कामसुखेषु वर्तते तथा तथेच्छा विषयेषु वर्धते ॥ ४३ ॥

9.43

यथा च कुष्ठव्यसनेन दुःखितः प्रतापनान् नैव शमं निगच्छति ।तथेन्द्रियार्थेष्व् अजितेन्द्रियश् चरन् न कामभोगैर् उपशान्तिम् ऋच्छति ॥ ४४ ॥

9.44

यथा हि भैषज्यसुखाभिकाङ्क्षया भजेत रोगान् न भजेत तत्क्षमम् ।तथा शरीरे बहुदुःखभाजने रमेत मोहाद् विषयाभिकाङ्क्षया ॥ ४५ ॥

9.45

अनर्थकामः पुरुषस्य यो जनः स तस्य शत्रुः किल तेन कर्मणा ।अनर्थमूला विषयाश् च केवला ननु प्रहेया विषमा यथारयः ॥ ४६ ॥

9.46

इहैव भूत्वा रिपवो वधात्मकाः प्रयान्ति काले पुरुषस्य मित्रताम् ।परत्र चैवेह च दुःखहेतवो भवन्ति कामा न तु कस्य चिच् छिवाः ॥ ४७ ॥

9.47

यथोपयुक्तं रसवर्णगन्धवद् वधाय किंपाकफलं न पुष्टये ।निषेव्यमाणा विषयाश् चलात्मनो भवन्त्य् अनर्थाय तथा न भूतये ॥ ४८ ॥

9.48

तत् एतद् आज्ञाय विपाप्मनात्मना विमोक्षधर्माद्युपसंहितं हितम् ।जुषस्व मे सज्जनसंमतं मतं प्रचक्ष्व वा निश्चयम् उद्गिरन् गिरम् ॥ ४९ ॥

9.49

इति हितम् अपि बह्व् अपीदम् उक्तः श्रुतमहता श्रमणेन तेन नन्दः ।न धृतिम् उपययौ न शर्म लेभे द्विरद इवातिमदो मदान्धचेताः ॥ ५० ॥

9.50

नन्दस्य भावम् अवगम्य ततः स भिक्षुः पारिप्लवं गृहसुखाभिमुखं न धर्मे ।सत्त्वाशयानुशयभावपरीक्षकाय बुद्धाय तत्त्वविदुषे कथयां चकार ॥ ५१ ॥

9.51

सौन्दरनन्दे महाकाव्ये मदापवादो नाम नवमः सर्गः ।

10.head

दशमः सर्गः

10.1

श्रुत्वा ततः सद्व्रतम् उत्सिसृक्षुं भार्यां दिदृक्षुं भवनं विविक्षुम् ।नन्दं निरानन्दम् अपेतधैर्यम् अभ्युज्जिहीर्षुर् मुनिर् आजुहाव ॥ १ ॥

10.2

तं प्राप्तम् अप्राप्तविमोक्षमार्गं पप्रच्छ चित्तस्खलितं सुचित्तः ।स ह्रीमते ह्रीविनतो जगाद स्वं निश्चयं निश्चयकोविदाय ॥ २ ॥

10.3

नन्दं विदित्वा सुगतस् ततस् तं भार्याभिधाने तमसि भ्रमन्तम् ।पाणौ गृहीत्वा वियद् उत्पपात मणिं जले साधुर् इवोज्जिहीर्षुः ॥ ३ ॥

10.4

काषायवस्त्रौ कनकावदातौ विरेजतुस् तौ नभसि प्रसन्ने ।अन्योन्यसंश्लिष्टविकीर्णपक्षौ सरःप्रकीर्णाव् इव चक्रवाकौ ॥ ४ ॥

10.5

तौ देवदारूत्तमगन्धवन्तं नदीसरःप्रस्रवणौघवन्तम् ।आजग्मतुः काञ्चनधातुमन्तं देवर्षिमन्तं हिमवन्तम् आशु ॥ ५ ॥

10.6

तस्मिन् गिरौ चारणसिद्धजुष्टे शिवे हविर् धूमकृतोत्तरीये ।आगम्य पारस्य निराश्रयस्य तौ तस्थतुर् द्वीप इवाम्बरस्य ॥ ६ ॥

10.7

शान्तेन्द्रिये तत्र मुनौ स्थिते तु सविस्मयं दिक्षु ददर्श नन्दः ।दरीश् च कुञ्जांश् च वनौकसश् च विभूषणं रक्षणम् एव चाद्रेः ॥ ७ ॥

10.8

बह्वायते तत्र सिते हि शृङ्गे संक्षिप्तबर्हः शयितो मयूरः ।भुजे बलस्यायतपीनबाहोर् वैडूर्यकेयूर इवाबभासे ॥ ८ ॥

10.9

मनःशिलाधातुशिलाश्रयेण पीताकृतांसो विरराज सिंहः ।संतप्तचामीकरभक्त्चित्रं रूप्याङ्गदं शीर्णम् इवाम्बिकस्य ॥ ९ ॥

10.10

व्याघ्रः क्लव्यायतखेलगामी लाङ्गूलचक्रेण कृतापस्व्यः ।बभौ गिरेः प्रस्रवणं पिपासुर् दित्सन् पितृभ्योऽम्भ इवावतिर्णः ॥ १० ॥

10.11

चलत्कदम्बे हिम्वन्नितम्बे तरौ प्रलम्बे चमरो ललम्बे ।छेत्तुं विलग्नं न शशाक बालं कुलोद्गतां प्रीतिम् इवार्यवृत्तः ॥ ११ ॥

10.12

सुवर्णगौराश् च किरातसंघा मयूरपत्रोज्ज्वलगात्रलेखाः ।सार्दूलपातप्रतिमा गुहाभयो निशेप्तुर् उद्गार इवाचलस्य ॥ १२ ॥

10.13

दरीचरीणाम् अतिसुन्दरिणां मनोहरश्रोणिकुचोधरीणाम् ।वृद्न्दानि रेजुर् दिशि किंनरीणां पुष्पोत्कचानाम् इव वल्लरीणाम् ॥ १३ ॥

10.14

नगान् नगस्योपरि देवदारून् आयासयन्तः कपयो विचेरुः ।तेभ्यः फलं नापुरतोऽपजग्मुर् मोघप्रसादेभ्य इवेश्वरेभ्यः ॥ १४ ॥

10.15

तस्मात् तु यूथाद् अपसार्यमाणां निष्पीदितालक्तकरक्तवक्राम् ।शाखामृगीम् एकविपन्नदृष्टिं दृष्ट्वा मुनिर् नन्दम् इदं बभाषे ॥ १५ ॥

10.16

का नन्द रूपेण च चेष्टया च संपश्यतश् चारुतरा मता ते ।एषा मृगी विअकविपन्न्दृष्टिः स वा जनो यत्र गता तवेष्टिः ॥ १६ ॥

10.17

इत्य् एवम् उक्तः सुगतेन नन्दः कृत्वा स्मितं किं चिद् इदं जगाद ।क्व चोत्तमस्त्री भगवन् बधूस् ते मृगि नगक्लेश्करी क्व चैषा ॥ १७ ॥

10.18

ततो मुनिस् तस्य निशम्य वाक्यं हेत्वन्तरं किं चिद् अवेक्षमाणः ।आलम्ब्य नन्दं प्रययौ तथैव क्रीडावनं वज्रधरस्य राज्ञः ॥ १८ ॥

10.19

ऋताव् र्ताव् आकृतिम् एक एके क्षणे क्षणे बिभ्रति यत्र वृक्षाः ।चित्रां समस्ताम् अपि के चिद् अन्ये षण्णाम् ऋतूनां श्रियम् उद्वहन्ति ॥ १९ ॥

10.20

पुष्यन्ति के चित् सुरभीर् उदारा मालाः स्रजश् च ग्रथिता विचित्राः ।कर्णानुकूलान् अवतंसकांष् च प्रत्यर्थिभूतान् इव कुण्डलानाम् ॥ २० ॥

10.21

रक्तानि फुल्लाः कमलानि यत्र प्रदीपवृक्षा इव भान्ति वृक्षा ।प्रफुल्लनीलोत्पलरोहिणोऽन्ये सोन्मीलिताक्षा इव भान्ति वृक्षा ॥ २१ ॥

10.22

नानाविरागाण्य् अथ पाण्डराणि सुवर्णभक्तिव्यवभासितानि ।अतान्तवान्य् एकघनानि यत्र सूक्ष्माणि वासांसि फलन्ति वृक्षा ॥ २२ ॥

10.23

हारान् मणीन् उत्तमकुण्डलानि केयूरवर्याण्य् अथ नूपुराणि ।एवंविधान्य् आभरणानि यत्र स्वर्गानुरूपाणि फलन्ति वृक्षः ॥ २३ ॥

10.24

वैडूर्यनालानि च काञ्चनानि पद्मानि वज्राङ्कुरकेसराणि ।स्पर्शक्षमाण्य् उत्तमगन्धवन्ति रोहन्ति निष्कम्पतला नलिन्यः ॥ २४ ॥

10.25

यत्रायतांश् चैव ततांश् च तांस् तान् वाद्यस्य हेतून् सुषिरान् घनांश् च ।फलन्ति वृक्षा मणिहेमचित्राः क्रीडासहायास् त्रिदशालयानाम् ॥ २५ ॥

10.26

मन्दारवृक्षांश् च कुशेशयांश् च पुष्पानतान् कोकनदांश् च वृक्षान् ।आक्रम्य माहात्म्यगुणैर् विराजन् राजायते यत्र स पारिजातः ॥ २६ ॥

10.27

कृष्टे तपःषीलहलैर् अखिन्नैस् त्रिपिष्टपक्षेत्रतले प्रसूताः ।एवंविधा यत्र सआनुवृत्ता दिवौकसां भोगविधानवृक्षाः ॥ २७ ॥

10.28

मनःशिलाभैर् वदनैर् विहङ्गा यत्राक्षिभिः स्पाटिकसंनिभैश् च ।शावैश् च पक्षैर् अभिलोहितान्तैर् माञ्जिष्ठकैर् अर्धसितैश् च पादैः ॥ २८ ॥

10.29

चित्रैः सुवर्णच्छदनैस् तथान्ये वैडुर्यवर्णाभिर् नयनैः प्रसन्नैः ।विहङ्गमा शिञ्जिरिकाभिधाना रुतैर् मनःश्रोतहरैर् भ्रमन्ति ॥ २९ ॥

10.30

रक्ताभिर् अग्रेषु च वल्लरीभिर् मध्येषु चामीकरपिञ्जराभिः ।वैडूर्यवर्णाभिर् उपान्तमध्येष्व् अलङ्कृता यत्र खगाश् चरन्ति ॥ ३० ॥

10.31

रोचिष्णवो नाम पत्रत्रिणोऽन्ये दीप्ताग्निवर्णा ज्वलितैर् इवास्यैः ।भ्रमन्ति दृष्टीर् वपुषाक्षिपन्तः स्वनैः शुभैर् अप्सरसो हरन्तः ॥ ३१ ॥

10.32

यत्रेष्टचेष्टाः सततप्रहृष्टा निरर्तयो निर्जरसो विशोकाः ।स्वैः कर्मभिर् हीनविशिष्टतमध्याः स्वयंप्रभाः पुण्यकृतो रमन्ते ॥ ३२ ॥

10.33

पूर्वं तपोमूल्यपरिग्रहेण स्वर्गक्रयार्थं कृतनिश्चयानां ।मनांसि खिन्नानि तपोधनानां हरन्ति यत्राप्सरसो लडन्त्याः ॥ ३३ ॥

10.34

नित्योत्सवं तं च निशाम्य लोकं निस्तन्द्रिनिद्रारतिशोकरोगम् ।नन्दो जरामृत्युवशं सदार्तं मेने श्मशानप्रतिमं नृलोकम् ॥ ३४ ॥

10.35

ऐन्द्रं वनं तच् च ददर्श नन्दः समन्ततो विस्मयफुल्लदृष्टिः ।हर्षान्विताश् चाप्सरसः परीयुः सगर्वम् अन्योन्यम् अवेक्षमाणाः ॥ ३५ ॥

10.36

सदा युवत्यो मदनैककार्याः साधारणाः पुण्यकृतां विहाराः ।दिव्याश् च निर्दोषपरिग्रहाश् च तपःफलस्याश्रयणं सुराणाम् ॥ ३६ ॥

10.37

तासां जगुर् धीरम् उदात्तम् अन्याः पद्मानि काश् चिल् ललितं लभञ्जुः ।अन्योन्यहर्षान् ननृतुस् तथान्याश् चिराङ्गहाराः स्तनभिन्नभाराः ॥ ३७ ॥

10.38

कासां चिद् आसां वदनानि रेजुर् वनान्तरेभ्यश् चलकुण्डलानि ।व्याविद्धपर्णेभ्य इवाकरेभ्यः पद्मानि कारण्डवघट्टितानि ॥ ३८ ॥

10.39

ताः निःसृताः प्रेक्ष्य वनान्तरेभ्यस् तडित्पताका इव तोयदेभ्यः ।नन्दस्य रागेण तनुर् विवेपे जले चले चन्द्रमसः प्रभेव ॥ ३९ ॥

10.40

वपुश् च दिव्यं ललिताश् च चेष्टास् ततः स तासां मनसा जहार ।कौतूहलावर्जितया च दृष्ट्या संश्लेषतर्षाद् इव जातरागः ॥ ४० ॥

10.41

स जाततर्षोऽप्सरसः पिपासुस् तत्प्राप्तयेऽधिष्ठितविक्लवार्तः ।लोलेन्द्रियाश्वेन मनोरथेन जेह्रियमाणो न धृतिं चकार ॥ ४१ ॥

10.42

यथा मनुष्यो मलिनं हि वासः क्षारेण भूयो मलिनीकरोति ।मलक्षयार्थं न मलोद्भवार्तं रजस् तथास्मै मुनिर् आचकर्ष ॥ ४२ ॥

10.43

दोषांश् च कायाद् भिषगुज् जिहीर्षुर् भूयो यथा क्लेशयितुं यतेत ।रागं तथा तस्य मुनिर् जिघांसुर् भूयस्तरं रागम् उपानिनाय ॥ ४३ ॥

10.44

दीपप्रभां हन्ति यथान्धकारे सहस्ररश्मेर् उदितस्य दीप्तिः ।मनुष्यलोके द्युतिम् अङ्गनानाम् अन्तर्दधात्य् अप्सरसां तथा श्रीः ॥ ४४ ॥

10.45

महच् च रूपं स्वणु हन्ति रूपं शब्दो महान् हन्ति च शब्दम् अल्पम् ।गुर्वी रुजा हन्ति रुजां च मृद्विं सर्वो महान् हेतुर् अणोर् वधाय ॥ ४५ ॥

10.46

मुनेः प्रभावाच् च शशाक नन्दस् तद्दर्शनं सोढुम् असह्यम् अन्यैः ।अवितरागस्य हि दुर्बलस्य मनो दहेद् अप्सरसां वपुःश्रीः ॥ ४६ ॥

10.47

मत्वा ततो नन्दम् उदीर्णरागं भार्यानुरोधाद् अपवृत्तरागम् ।रागेण रागं प्रतिहन्तुकामो मुनिर् विरागो गिरम् इत्य् उवाच ॥ ४७ ॥

10.48

एताः स्त्रीयः पश्य दिवौकसस् त्वं निरीक्ष्य च ब्रूहि यथार्थत्त्वम् ।एताः कथं रूपगुणैर् मतास् ते स वा जनो यत्र गतं मनस् ते ॥ ४८ ॥

10.49

अथाप्सरःस् एव निविष्टदृष्टी रागाग्निनान्तर्हृदये प्रदीप्तः ।सगद्गगदं कामविषक्तचेताः कृताञ्जलिर् वाक्यम् उवाच नन्दः ॥ ४९ ॥

10.50

हर्यङ्गनासौ मुषितैकदृष्टिर् यदन्तरे स्यात् तव नाथ वध्वाः ।तदन्तरेऽसौ कृपणा वधूस् ते वौष्मतीर् अप्सरसः प्रतीत्य ॥ ५० ॥

10.51

आस्था यथा पूर्वम् अभून् न का चिद् अन्यासु मे स्त्रिषु निशाम्य भार्याम् ।तस्यां ततः सम्प्रति का चिद् आस्था न मे निशाम्यैव हि रूपम् आसाम् ॥ ५१ ॥

10.52

यथा प्रतप्तो मृदुनातपेन दह्येत कश् चिन् महतानलेन ।रागेण पूर्वं मृदुनाभितप्तो रागानिनानेन तथाभिदह्ये ॥ ५२ ॥

10.53

वाग्वारिणा मां परिषिञ्च तस्माद् यावन् न दह्ये स इवाह्जशत्रुः ।रारागिनर् अद्यैव हि मां दिधक्षुः कक्षं सवृक्षाग्रम् इवोत्थितोऽग्निः ॥ ५३ ॥

10.54

प्रसीद सीदामि विमुञ्च मा मुने वसुन्धराधैर्य न धैर्यम् अस्ति मे ।असून् विमोक्ष्यामि विमुक्तमानस प्रय्च्छ वा वागमृतं मुमूर्षवे ॥ ५४ ॥

10.55

अनर्थभोगेन विघातय्दृष्तिना प्रमाददंश्ट्रेण तमोविषाग्निना ।अहं हि दष्टो हृदि मन्मथाहिना विधत्स्य तस्माद् अगदं महाभिषक् ॥ ५५ ॥

10.56

अनेन दष्टो मदनाहिना हि ना न कश् चिद् आत्मन्य् अनवस्थितः स्थितः ।मुमोह वोध्योर् ह्य् अचलात्मनो मनो बभूव धीमांश् च स शन्तनुस् तनुः ॥ ५६ ॥

10.57

स्थिते विशिष्टे त्वयि संश्रये श्रये यथा न यामीह वसन् दिशं दिशम् ।यथा च लब्ध्वा व्यसनक्षयं क्षयं व्रजामि तन् मे कुरु शंसतः सतः ॥ ५७ ॥

10.58

ततो जिघांसुर् हृदि तस्य तत्तमस् तमोनुदो नक्तम् इवोत्थितं तमः ।महर्षिचन्द्रो जगतस् तमोनुदस् तमःप्रहीणो निजगाद गौतमः ॥ ५८ ॥

10.59

धृतिं परिष्वज्य विधूय विक्रियां निगृह्य तावच् छ्रुतचेतसी शृणु ।इमा यदि प्रार्थयसे त्वम् अङ्गना विधत्स्व शुल्कार्थम् इहोत्तमं तपः ॥ ५९ ॥

10.60

इमा हि शक्या न बलान् न सेवया न संप्रदानेन न रूप्तवत्तया ।इमा ह्रियन्ते खलु धर्मचर्यया सचेत् प्रहर्षश् चर धर्मम् आदृतः ॥ ६० ॥

10.61

इहाधिवासो दिवि दैवतैः समं वनानि रम्याण्य् अजराश् च योषितः ।इदं फलं स्वस्य शुभस्य कर्मणो न दत्तम् अन्येन न चाप्य् अहेतुतः ॥ ६१ ॥

10.62

क्षितौ मनुष्यो धनुराधिभिः श्रमैः स्त्रियः कदा चिद् धि लभेत वा न वा ।असंशयं यत् त्व् इह धर्मचर्यया भवेयुर् एता दिवि पुणकर्मणः ॥ ६२ ॥

10.63

तद् अप्रमत्तो नियमे समुद्यतो रमस्व यद्य् अप्सरसोऽभिलिप्ससे ।अहं च तेऽत्र प्रतिभूः स्थिरे व्रते यथा त्वम् आभिर् नियतं समेष्यसि ॥ ६३ ॥

10.64

अतःपरं परमम् इति व्यवस्थितः परां धृतिम् परममुनौ चकार सः ।ततो मुनिः पवन इवाम्बरात् पतन् प्रगृह्य तं पुनर् अगमन् महीतलम् ॥ ६४ ॥

10.65

सौन्दरनन्दे महाकाव्ये स्वर्गनिदर्शनो नाम दशमः सर्गः ।

11.head

एकादशः सर्गः

11.1

ततस् ता योषितो दृष्ट्वा नन्दो नन्दनचारिणीः ।बबन्ध नियमस्तम्भे दुर्दमं चपलं मनः ॥ १ ॥

11.2

सोऽनिश्टनिऐष्क्रम्यरसो म्लानतामरसोपमः ।चचार विरसो धर्मं निवेश्याप्सरसो हृदि ॥ २ ॥

11.3

तथा लोलेन्द्रियो भूत्वा दयितेन्द्रियगोचरः ।इन्द्रियार्थवशाद् एव बभूव नियतेन्द्रियः ॥ ३ ॥

11.4

कामचर्यासु कुशलो भिक्षुचर्यासु विक्लवः ।परमाचार्यविष्टब्धो ब्रह्मचर्यं चचार सः ॥ ४ ॥

11.5

संवृतेन च शान्तेन तीव्रेण मदनेन च ।जलाग्नेर् इव संसर्गाच् छशाम च शुशोष च ॥ ५ ॥

11.6

स्वभावदर्शनीयोऽपि वैरूप्यम् अगमत् परम् ।चिन्तयाप्सरसां चैव नियमेनायतेन च ॥ ६ ॥

11.7

प्रस्तवेष्व् अपि भार्यायां प्रियभार्यस् तथापि सः ।वीतराग इवोत्तस्थौ न जहर्ष न चुक्षुभे ॥ ७ ॥

11.8

तं व्यवस्थितम् आज्ञाय भार्यारागात् पराङ्मुखम् ।अभिगम्याब्रवीन् नन्दम् आनन्दः प्रणयाद् इदम् ॥ ८ ॥

11.9

अहो सदृशम् आरब्धं श्रुतस्याभिजनस्य च ।निगृहीतेन्द्रियः स्वस्थो नियमे यदि संस्थितः ॥ ९ ॥

11.10

अभिष्वक्तस्य कामेषु रागिणो विषयात्मनः ।यद् इयं संविद् उत्पन्ना नेयम् अल्पेन हेतुना ॥ १० ॥

11.11

व्याधिर् अल्पेन यत्नेन मृदुः प्रतिनिवार्यते ।प्रबलः प्रबलैर् एव यत्नैर् नश्यत्ति वा न वा ॥ ११ ॥

11.12

दुर्हरो मानसो व्याधिर् बलवांश् च तवाभवत् ।विनिवृत्तो यदि स ते सर्वथा धृतिमानसि ॥ १२ ॥

11.13

दुष्करं साध्व् अनार्येण मानिना चैव मार्दवम् ।अतिसर्गश् च लुब्धेन ब्रमचर्यं च रागिणा ॥ १३ ॥

11.14

एकस् तु मम संदेहस् तवास्यां नियमे धृतौ ।अत्रानुनयम् इच्छामि वक्तव्यं यदि मनसे ॥ १४ ॥

11.15

आर्जवाभिहितं वाक्यं न च गन्तव्यम् अन्यथा ।रूक्षम् अप्य् आशये शुद्धे रूक्षतो नैति सज्जनः ॥ १५ ॥

11.16

स्प्रियं हि हितं स्निग्धम् अस्निग्धम् अहितं प्रियं ।दुर्लभं तु प्रियहितं स्वादु पथ्यम् इवौषधम् ॥ १६ ॥

11.17

विश्वासश् चार्थचर्या च सामान्यं सुखदुःखयोः ।मर्षणं प्रणयश् चैव मित्रवृत्तिर् इयं सताम् ॥ १७ ॥

11.18

तद् इदं त्वा विवक्षामि प्रणयान् न जीघांसया ।त्वच्छ्रेयो हि विवक्षा मे यतो नार्हाम्य् उपेक्षितुम् ॥ १८ ॥

11.19

अप्सरोभृतको धर्मं चरसीत्य् अभिदीयसे ।किम् इदं भूतम् आहोस्वित् प्ररिहासोऽयम् ईदृशः ॥ १९ ॥

11.20

यदि तावद् इदं सत्यं वक्ष्याम्य् अत्र युदषधम् ।औद्धत्यम् अथ वक्तृमा अभिदास्यामि तत्त्वतः ॥ २० ॥

11.21

श्लक्ष्णपूर्वम् अथो तेन हृदि सोऽभिहतस् तदा ।ध्यात्वा दीर्घं निशश्वास किं चिच् चावाङ्मुखोऽभवत् ॥ २१ ॥

11.22

ततस् तस्येङ्गितं ज्ञात्वा मनःसंकल्पसूचकम् ।बभाषे वाक्यम् आनन्दो मधुरोदर्कम् अप्रियम् ॥ २२ ॥

11.23

आकारेणावगच्छामि तव धर्मप्रयोजनम् ।यज् ज्ञात्वा त्वयि जातं मे हास्यं काउण्यम् एव च ॥ २३ ॥

11.24

यथासनार्थं स्कन्धेन कश् चिद् गुर्वीं शिलां वहेत् ।तद्वत् त्वम् अपि कामार्थं नियमं वोढुम् उद्यतः ॥ २४ ॥

11.25

तिताडयिषयासृप्तो यथा मेषोऽपसर्पति ।तद्वद् अब्रह्मचर्याय ब्रह्मचर्यम् इदं तव ॥ २५ ॥

11.26

चिक्रीषन्ति यथा पण्यं वणिजो लाभलिप्सया ।धर्मचर्या तव तथा पण्यभूता न शान्तये ॥ २६ ॥

11.27

यथा फलविशेषार्थं बीजं वपति कार्षकः ।तद्वद् विषयकार्पण्याद् विषयांस् त्यक्तवान् असि ॥ २७ ॥

11.28

आकाङ्क्षेच् च यथा रोगं प्रतीकारसुखेप्सया ।दुःखम् अन्विच्छति भवांस् तथा विषयतृश्णया ॥ २८ ॥

11.29

यथा पश्यति मध्व् एव न प्रपातम् अवेक्षते ।पश्यस्य् अप्सरसस् तद्वद् भ्रंशम् अन्ते न पश्यसि ॥ २९ ॥

11.30

हृदि कामाग्निना दीप्ते कायेन वहतो व्रतम् ।किम् इदं ब्रह्मचर्यं ते मनसाब्रह्मचारिणः ॥ ३० ॥

11.31

संसारे वर्तमानेन यदा चाप्सरसस् त्वया ।प्राप्तास् त्यक्ताश् च शतशस् ताभ्यः किम् इति ते स्पृहा ॥ ३१ ॥

11.32

तृप्तिर् नास्तीन्धनैर् अग्नेर् नाम्भसा लवणाम्भसः ।नापि कामैः सतृष्णस्य तस्मात् कामा न तृप्तये ॥ ३२ ॥

11.33

अतृप्तौ च कुतः शान्तिर् अशान्तौ च कुतः सुखम् ।असुखे च कुतः पृतिर् अप्रीतौ च कुतो रतिः ॥ ३३ ॥

11.34

रिरंसा यदि ते तस्माद् अध्यात्मे धीयतां मनः ।प्रशान्त चानवद्या च नास्त्य् अध्यात्मसमा रतिः ॥ ३४ ॥

11.35

न तत्र कार्यं तूर्यैस् ते न स्त्रीभिर् न विभूषनैः ।एकस् त्वं यत्रत्रस्थस् तया रत्याभिरंस्यसे ॥ ३५ ॥

11.36

मानसं बलवद् दुःखं तर्षे तिष्ठति तिष्ठति ।तं तर्षं छिन्धि दुःखं हि तृष्णा चास्ति च नास्ति च ॥ ३६ ॥

11.37

संपत्तौ वा विपत्तौ वा दिवा वा नक्तम् एव वा ।कामेषु हि सटृष्ञस्य न शान्तिर् उपदद्यते ॥ ३७ ॥

11.38

कामानां प्रार्थना दुःखा प्राप्तौ तृप्तिर् न विद्यते ।वियोगान् नियतः शोको वियोगश् च ध्रुवो दिवि ॥ ३८ ॥

11.39

कृत्वापि दुष्करं कर्म स्वर्गं लब्ध्वापि दुर्लभम् ।नृलोकं पुनर् एवैति प्रवासात् स्वगृहं यथा ॥ ३९ ॥

11.40

यदा भ्रष्टस्य कुशलं शिष्टं किं चिन् न विद्यते ।त्रियक्षु पितृलोके वा नरके वोपपद्यते ॥ ४० ॥

11.41

तस्य भुक्तवतः स्वर्गे विषयान् उत्तमान् अपि ।भ्रष्टस्यार्तस्य दुःखेन किम् आस्वादः करोति सः ॥ ४१ ॥

11.42

श्येनाय प्राणिवात्सल्यात् स्वमांसान्य् अपि दत्तवान् ।शिभिः स्वर्गात् परिभ्रष्टस् तादृक् कृत्वापि दुष्करम् ॥ ४२ ॥

11.43

शक्रस्यार्धासनं गत्वा पूर्वपार्थिव एव यः ।सदेवतं गते काले मान्धाताधः पुनर् ययौ ॥ ४३ ॥

11.44

राज्यं कृत्वापि देवानां पपात नहुषो भुवि ।प्राप्तः किल ब्जुअङ्गत्वं नाद्यापि परिमुच्यते ॥ ४४ ॥

11.45

तथैवेलिविलो राज राजवृत्तेन संस्कृतः ।स्वर्गं गत्वा पुनर् भ्रष्टः कूर्मीभूतः किलार्णवे ॥ ४५ ॥

11.46

भूर्दियुम्नो ययातिश् च ते चान्ये च नृपर्षभाः ।कर्मभिर् द्याम् अभिक्रीय तत्क्षयात् पुनर् अत्यजन् ॥ ४६ ॥

11.47

असुराः पूर्वद्वास् तु सुरैर् अपहृतश्रियः ।श्रियं समनुशोचन्तः पातालं शरज्नं ययुः ॥ ४७ ॥

11.48

किं च राजर्षिभिस् तावद् असुरैर् वा सुरादिभिः ।महेन्द्राः शतशः पेतुर् माहात्म्यम् अपि न स्थिरम् ॥ ४८ ॥

11.49

संसदं शोभयित्वैन्द्रीम् उपेन्द्रश् च त्रिविक्रमः ।क्षीणकर्मा पपातोर्व्रिं मध्याद् अप्सरसां रसन् ॥ ४९ ॥

11.50

हा चैत्ररथ हा वापि हा मन्दाकिनि हा प्रिये ।इत्य् आर्ता विलपन्तोऽपि गां पतन्ति दिवौकसः ॥ ५० ॥

11.51

तीव्रं ह्य् उत्पद्यते दुःखम् इह तावन् मुमूर्षताम् ।किं पुनः पततां स्वर्गाद् एवान्ते सुखसेविनाम् ॥ ५१ ॥

11.52

रजो गृह्णन्ति वासांसि म्लायन्ति परमाः स्रजः ।गात्रेभ्यो जायते स्वेदो रतिर् भवति नासने ॥ ५२ ॥

11.53

एतान्य् आदौ निमित्तानि च्युतौ स्वर्गाद् दिवौकसाम् ।अनिष्टानिव मर्त्यानाम् अरिष्टानि मुमूर्षताम् ॥ ५३ ॥

11.54

सुखम् उत्पद्यते यच् च दिवि कामान् उपाश्नताम् ।यच् च दुःखं निपततां दुःखम् एव विषिष्यते ॥ ५४ ॥

11.55

तस्माद् अस्वन्तम् अत्राणम् अविश्वास्यम् अतर्पकम् ।विज्ञाय क्षयिणं स्वर्गम् अपवर्गे मतिं कुरु ॥ ५५ ॥

11.56

अशरीरं भवाग्रं हि गत्वापि मुनिर् उद्रकः ।कर्मणोऽन्ते च्युतस् तस्मात् तिर्यग्योनिं प्रपत्स्यते ॥ ५६ ॥

11.57

मैत्रया स्प्तवार्षिक्या ब्रह्मलोकम् इतो गतः ।सुनेत्रः पुनर् आवृत्तो गर्भवासम् उपेयिवान् ॥ ५७ ॥

11.58

यद चैश्चर्यवन्तोऽपि क्षयिञः स्वर्गवासिनः ।को नाम स्वर्गवासाय क्षेष्णवे स्पृहयेद् बुधः ॥ ५८ ॥

11.59

सूत्रेण बद्धो हि यथा विहङ्गो व्यावर्तते दूरगतोऽपि भूयः ।अज्ञानसूत्रेण तथावबद्धो गतोऽपि दूरं पुनर् एति लोकः ॥ ५९ ॥

11.60

कृत्वा कालविलक्षञं प्रतिभुवा मुक्तो यथा बन्धनाद् भुक्त्वा वेश्मसुखान्य् अतीत्य समयं भूयो विशेद् बन्धनम् ।तद्वद् द्यां प्रतिभूवद् आत्मनियमैर् ध्यानादिभिः प्राप्तवान् काले कर्मसु तेषु भुक्तविषयेष्व् आकृष्यते गां पुनः ॥ ६० ॥

11.61

अन्तर्जालगताः प्रमत्तमनसो मिनास् तडागे यथा जानन्ती व्यसनं न रोधजनितं स्वस्थाश् चरन्त्य् अम्भसि ।अन्तर्लोकगताः कृतार्थमतयस् तद्वद् दिवि ध्यायिनो मन्यन्ते शिवम् अच्युतं ध्रुवम् इति स्वं स्थानम् आवर्तकम् ॥ ६१ ॥

11.62

तज्जन्मव्याधिमृत्युव्यसनपरिगतं मत्वा जगद् इदं संसारे भ्राम्यमाणं दिवि नृषु नरके तिर्यक्पितृषु च ।यत् त्राणं निर्भयं यच् छिवम् अमरजरं निःषोकम् अमृतं तद्धेतोर् ब्रह्मचर्यं चर जहिहि चलं स्वर्गं प्रति रुचिम् ॥ ६२ ॥

11.63

सौन्दरनन्दे महाकाव्ये स्वर्गापवादो नामैकदशः सर्गः ।

12.head

द्वादशः सर्गः

12.1

अप्सरोभृतको धर्मं चरसीत्य् अथ चोदितः ।आनन्देन तदा नन्दः परं व्रीडम् उपागमत् ॥ १ ॥

12.2

तस्य व्रिडेन महता प्रमोदो हृदि नाभवत् ।अप्रामोद्येन विमुखं नावतस्थे व्रते मनः ॥ २ ॥

12.3

कामरागप्रधानोऽपि परिहाससमोऽपि सन् ।परिपाकगते हेतौ न स तन् ममृषे वचः ॥ ३ ॥

12.4

अपरीक्षब्कभावाच् च पूर्वं मत्वा दिवं ध्रुवम् ।तस्मात् क्षेष्णुं परिश्रुत्य भृशं संवेगम् एयिवान् ॥ ४ ॥

12.5

तस्य स्वर्गान् निववृते संकल्पाश्वो मनोरथः ।महारथ इवोन्मार्गाद् अप्रमत्तस्य सारथेः ॥ ५ ॥

12.6

स्वर्गतर्षान् निवृत्तश् च सद्यः स्वस्थ इवाभवत् ।मृष्टाद् अपथ्याद् विरतो जिजीब्षुर् इवातुरः ॥ ६ ॥

12.7

विसस्मार प्रियां भार्यां अस्प्सरोदर्शनाद् यथा ।तथानित्यतयोद्विग्नस् तत्याजाप्सरसोऽपि सः ॥ ७ ॥

12.8

महताम् अपि भूतानाम् आवृत्ति इति चिन्तयन् ।संवेगाच् च सरागोऽपि वीतराग इवाभवत् ॥ ८ ॥

12.9

बभूव स हि संवेगः श्रेयसस् तस्य वृद्धये ।धातुर् एधिर् इवाख्याते पठितोऽक्षरचिन्तकैः ॥ ९ ॥

12.10

न तु कामान्मनस् तस्य केन चिज् जगृहे धृतिः ।त्रिषु कालेषु सर्वेषु निपातोऽस्तिर् इव स्मृतः ॥ १० ॥

12.11

खेलगामी महाबाहुर् गजेन्द्र इव निर्मदः ।सोऽभ्यगच्छद् गुरुं कले विवक्षुर् भावम् आत्मनः ॥ ११ ॥

12.12

प्रणम्य च गुरौ मूर्ध्ना बाष्पव्याकुललोचनः ।कृत्वान्जलिम् उवाचेदं ह्रिया किं चिद् अवाञ्मुखः ॥ १२ ॥

12.13

अप्सरःप्राप्तये यन् मे भगवन् प्रतिभूर् असि ।नाप्सरोभिर् ममार्थोऽस्ति प्रतिभूत्वं त्यजाम्य् अहम् ॥ १३ ॥

12.14

श्रुत्वा ह्य् आवर्तकं स्वर्गं संसारस्य च चित्रताम् ।न मर्त्येषु न देवेषु प्रवृत्तिर् मम रोचते ॥ १४ ॥

12.15

यदि प्राप्य दिवं यत्नान् नियमेन दमेन च ।अवितृप्ताः पतनत्य् अन्ते स्वर्गाय त्यागिने नमः ॥ १५ ॥

12.16

अतश् च निखिलं लोकं विदिबा सचराचरम् ।सर्वदुःखक्षयकरे त्वद्धर्मे परमे रमे ॥ १६ ॥

12.17

तस्माद् व्यासमासाभ्यां तन् मे व्याख्यातुम् अर्हसि ।यच् छ्रुत्वा शृण्वतां श्रेष्ठ परमं प्राप्नुयां पदम् ॥ १७ ॥

12.18

ततस् तस्याशयं ज्ञात्वा विपक्षाणिन्द्रियाणि च ।श्रेयश् चैवामुखीभूतं निजगाद तथागतः ॥ १८ ॥

12.19

अहो प्रत्यवमर्शोऽयं श्रेयसस् ते पुरोजवः ।अरण्यां मथ्यमानायाम् अग्नेर् धूम इवोत्थितः ॥ १९ ॥

12.20

चिरम् उन्मार्गविहृतो लोलैर् इन्दियवाजिभिः ।अवतिर्णोऽसि पन्थानं दिष्ट्या दृश्त्याविमूढया ॥ २० ॥

12.21

अद्य ते सफलं जन्म लाभोऽद्य सुमहांस् तव ।यस्य कामरस्ज्ञस्य नैष्क्रम्यायोत्सुकं मनः ॥ २१ ॥

12.22

लोकेऽस्मिन्न् आलयारामे निवृत्तौ दुर्लभा रतिः ।व्यथन्ते ह्य् अपुनर्भावात् प्रपाताद् इव बालिशाः ॥ २२ ॥

12.23

दुःखं न स्यात् सुखं मे स्याद् इति प्रयतते जनः ।अत्यन्तदुःखोपरमं सुखं तच् च न बुध्यते ॥ २३ ॥

12.24

ऐर्भूतेष्व् अनित्येषु सततं दुःखहेतुशु ।कामादिषु जगत् सक्तं न वेत्ति सुखम् अव्ययम् ॥ २४ ॥

12.25

सर्वदुःखापहं तत् तु हस्तथम् अमृतं तव ।विषं पीत्वा यद् अगदं समये पातुम् इच्छसि ॥ २५ ॥

12.26

अनर्हसंसारभयं मानार्हं ते चिकीर्षितम् ।रागाग्निस् तादृषो यस्य धर्मोन्मुख पराण्मुखः ॥ २६ ॥

12.27

रागोद्दामेन मनसा सर्वथा दुष्करा धृतिः ।सदोषम् सलिलं दृष्ट्वा पथिनेव पिपासुना ॥ २७ ॥

12.28

ईदृशी नाम बुद्धिस् ते निरुद्धा रजसाभवत् ।रजसा चण्डवातेन विवस्वत इव प्रभा ॥ २८ ॥

12.29

सा जिघांसुस् तमो हार्दं या संप्रति विजृम्भते ।तमो नैशं प्रभा सौरी विनिर्गीर्णेव मेरुणा ॥ २९ ॥

12.30

युक्तरूपम् इदं चैव शुद्धसत्त्वस्य चेतसः ।यत् ते स्यान् नैष्ठिके सूक्ष्मे श्रेयसि श्रद्दधानता ॥ ३० ॥

12.31

धर्मच्छन्दम् इमं तस्माद् विवर्धयितुम् अर्हसि ।सर्वधर्मा हि धर्मज्ञ नियमाच्x छन्दहेतवः ॥ ३१ ॥

12.32

सत्यां गमनबुद्धौ हि गमनाय प्रवर्तते ।शय्याबुद्धौ च शयनं स्थानबुद्धौ तथा स्थितिः ॥ ३२ ॥

12.33

अन्तर्भूमिगतं ह्य् अम्भः श्रद्दधाति नरो यदा ।अर्थित्वे सति यत्नेन तदा खनति गाम् इमाम् ॥ ३३ ॥

12.34

नार्थि यद्य् अग्निना वा स्याच् छ्रद्दध्यात् तं न वारणौ ।मथ्नीयान् नारणिं कश् चित् तद्भावे सति मथ्यते ॥ ३४ ॥

12.35

सस्योत्पत्तिं यदि न वा श्रद्दध्यात् कार्षकः क्षितौ ।अर्थी सस्येन वा न स्याद् भीजानि न वपेद् भुवि ॥ ३५ ॥

12.36

अतश् च हस्त इत्य् उक्ता मया श्रद्धा विशेषतः ।यस्माद् गृह्णाति सद्धर्मं दायं हस्त इवाक्षतः ॥ ३६ ॥

12.37

प्राधान्याद् इन्द्रियम् इति स्थिरत्वाद् बलम् इत्य् अतः ।गुणदारिद्र्यशमनाद् धनम् इत्य् अभिवर्णिता ॥ ३७ ॥

12.38

रक्षणार्थेन धर्मस्य तथेषीकेत्य् उदाहृता ।लोकेऽस्मिन् दुर्लभत्वाच् च रत्नम् इत्य् अभिहाषिता ॥ ३८ ॥

12.39

पुनश् च बीजम् इत्य् उक्ता निमित्तं श्रेयसोत्पदा ।पावनार्थेन पापस्य नदीत्य् अभिहिता पुनः ॥ ३९ ॥

12.40

यस्माद् धर्मस्य चोत्पत्तौ श्रद्धा कारणम् उत्तमम् ।मयोक्ता कार्यतस् तस्मात् तत्र तत्र तथा तथा ॥ ४० ॥

12.41

श्रद्धाङ्कुरम् इमं तस्मात् संवर्धयितुम् अर्हसि ।तद् वृद्धौ वर्धते धर्मो मूलवृद्धौ यथा द्रुमः ॥ ४१ ॥

12.42

व्याकुलं दर्शनं यस्य दुर्बलो यस्य निश्चयः ।तस्य पारिप्लवा श्रद्धा न हि कृताय वर्तते ॥ ४२ ॥

12.43

यावत् तत्त्वं न भवति हि दृष्टं श्रुतं वा तावच् छ्रद्धा न भवति बलस्था स्थिरा वा ।दृष्टे तत्त्वे नियमपरिभूतेन्द्रियस्य श्रद्धावृक्षो भवति सफलश् चाश्रयास् च ॥ ४३ ॥

12.44

सौन्दरनन्दे महाकाव्ये पर्यवमर्शो नाम द्वादशः सर्गः ।

13.head

त्रयोदशः सर्गः

13.1

अथ संराधितो नन्दः श्रद्धां प्रति महर्षिना ।परिक्षिक्तोऽमृतेनेव युयुजे परया मुदा ॥ १ ॥

13.2

कृतार्थम् इव तं मेने संबुद्धः श्रद्धया तया ।मेने प्राप्तम् इव श्रेयः स च बुद्धेन संस्कृतः ॥ २ ॥

13.3

श्लक्ष्णेन वचसा कांश् चित् कांश् चित् परुषया गिरा ।कांश् चिद् आभ्याम् उपायाभ्यां स विनिन्ये विनायकः ॥ ३ ॥

13.4

पांसुभ्यः काञ्चनं जातं विशुद्धं निर्मलं शुचि ।स्थितं पांसुष्व् अपि यथा पांसुदोषैर् न लिप्यते ॥ ४ ॥

13.5

पद्मपर्णं यथा चैव जले जातं जले स्थिथम् ।उपरिष्टाद् अधस्ताद् वा न जलेन्दोपलिप्यते ॥ ५ ॥

13.6

तद्वल् लोके मुनिर् जातो लोकस्यानुग्रहं चरन् ।कृतित्वान् निर्मलत्वाच् च लोकधर्मैर् न लियते ॥ ६ ॥

13.7

श्लेषं त्यागं प्रियं रूक्षं कथां च ध्यानम् एव च ।मन्तुकाले चिकित्सार्थं चक्रे नात्मानुवृत्तये ॥ ७ ॥

13.8

अतश् च संदधे दायं महाकरुणया तया ।मोचयेयं कथं दुःखात् सत्त्वानीत्य् अनुकम्पकः ॥ ८ ॥

13.9

अथ संहर्षणान् नदं विदित्वा भाजनीकृतम् ।अब्रवीद् ब्रुवतां श्रेष्ठः क्रमज्ञः श्रेयसां क्रमम् ॥ ९ ॥

13.10

अतः प्रभृति भूयस् त्वं श्रद्धेन्द्रियपुरःसरः ।अमृतस्याप्तये सौम्य वृत्तं रक्षितुम् अर्हसि ॥ १० ॥

13.11

प्रयोगः कायवचसोः शुद्धो भवति ते यथा ।उत्तानो निवृतो गुप्तोऽनवच्छिद्रस् तथा कुरु ॥ ११ ॥

13.12

उत्तानो भावकरञाद् विवृतश् चाप्य् अगूहनात् ।गुप्तो रक्षणतात्पर्याद् अच्छिद्रश् चानवद्यतः ॥ १२ ॥

13.13

शरीरवचसोः शुद्धौ सप्ताङ्गे चापि कर्मणि ।आजीवसमुदाचारं शौचात् संस्कर्तुम् अर्हसि ॥ १३ ॥

13.14

दोषानां कुहनादीनां पञ्चानाम् अनिषेवणात् ।त्यागाच् च ज्योतिषादीनां चतुर्णां वृत्तिघातिनाम् ॥ १४ ॥

13.15

प्राणिधान्यधनादीनां वर्ज्यानाम् अप्रतिग्रहात् ।भैषाङ्गानां निसृष्टानां नियतानां प्रतिग्रहात् ॥ १५ ॥

13.16

पर्तिउष्टः शुचिर् मञ्जुश् चौक्षया जीवसंपदा ।कुर्या दुःखप्रतीकारं यावद् एव विमुक्तये ॥ १६ ॥

13.17

कर्मञो हि यथादृष्तात् कायवाक्प्रभवाद् अपि ।आजीवः पृथग् एवोक्तो दुःषोधत्वाद् अयं मया ॥ १७ ॥

13.18

गृहस्थेन हि दुःशोब्धा दृष्टिर् विविधदृष्टिना ।आजीवो भिक्षुणा चैव परेष्टायत्तवृत्तिना ॥ १८ ॥

13.19

एतावच् छीलम् इत्य् उक्तम् आचाअरोऽयं समासतः ।अस्य नाशेन नैव स्यात् प्रव्रज्या न गृहस्थता ॥ १९ ॥

13.20

तस्माच् चारित्रसंपन्नो ब्रह्मचर्यम् इदं चर ।अणुमात्रेष्व् अवद्येषु भयदर्शि दृढव्रतः ॥ २० ॥

13.21

शीलम् आस्थाय वर्तन्ते सर्वा हि श्रेयसि क्रियाः ।स्थानाद्यानिव कार्याणि प्रतिष्ठाय वसुन्धराम् ॥ २१ ॥

13.22

मोक्षस्योपनिषत् सौम्य वैराग्यम् इति गृह्यताम् ।वैरागस्यापि संवेदः संविदो ज्ञानर्दर्शनम् ॥ २२ ॥

13.23

ज्ञानस्योपनिषच् चैव समाधिर् उपधार्यताम् ।समाधेर् अप्य् उपनिषत् सुखं शरीरमानसम् ॥ २३ ॥

13.24

पश्रब्धिः कायमनसः सुखस्योपनिषत्परा ।प्रशब्धेर् अप्य् उपनिषत् प्रामोद्यं परमं ममतम् ॥ २४ ॥

13.25

तथः प्रीतेर् उपनिषत् प्रामोद्यं परमं मतम् ।प्रामोद्यस्याप्य् अह्रल्लेखः कुकृतेष्व् अकृतेषु वा ॥ २५ ॥

13.26

अह्रल्लेखस्य मनसः शीलं तूपनिषच् छुचि ।अतः शीलं नयत्य् अग्र्यम् इति शीलं विशोधय ॥ २६ ॥

13.27

शीलनाच् छीलम् इत्य् उक्तं शीलनं सेवनाद् अपि ।सेवनं तन्निदेशाच् च निदेशश् च तदाश्रयात् ॥ २७ ॥

13.28

शीलं हि शरणं सौम्य कान्तार इव दैशिकः ।मित्रं बन्धुश् च रक्षा च धनं च बलम् एव च ॥ २८ ॥

13.29

यतः शीलम् अतः सौम्य शीलं संस्कर्तुम् अर्हसि ।एतत् स्थानम् अथान्ये च मोक्षारम्भेषु योगिनां ॥ २९ ॥

13.30

ततः स्मृतिम् अधिष्ठाय चपलानि स्वभावतः ।इन्द्रियाणीन्द्रियार्थेभ्यो निवारयितुम् अर्हसि ॥ ३० ॥

13.31

भेतव्यं न तथा शत्रोर् नाग्नेर् नाहेर् न चाशनेः ।इन्द्रियेभ्यो यथा स्वेभ्यस् तैर् अजस्रं हि हन्यते ॥ ३१ ॥

13.32

द्विषद्भिः शत्रुभिः कश् चित् कदा चित् पीड्यते न वा ।इन्द्रियैर् बाध्यते सर्वः सर्वत्र च सदैव च ॥ ३२ ॥

13.33

न च प्रयाति नरकं शत्रुप्रभृथिभिर् हतः ।कृष्यते तत्र निघ्नस् तु चपलैर् इन्द्रियैर् हतः ॥ ३३ ॥

13.34

हन्यमानस्य तैर् दुःखं हार्दं भवति वा न वा ।इन्द्रियैर् बाध्यमानस्य हार्दं शारीरम् एव च ॥ ३४ ॥

13.35

संकल्पविषदिग्धा हि पञ्चेन्द्रियमयाः शराः ।चिन्तापुङ्खा रैफला विषयाकाशगोचराः ॥ ३५ ॥

13.36

मनुष्यहरिणान् घ्नन्ति कामव्याधेरिता हृदि ।विहन्यन्ते यदि न ते ततः पतन्ति तैः क्षताः ॥ ३६ ॥

13.37

नियमाजिरसंस्थेन धैर्यकार्मुकधारिणा ।निपतन्तो निवार्यास् ते महता स्मृतिवर्मणा ॥ ३७ ॥

13.38

इन्द्रियाणाम् उपशमाद् अरीणां निग्रहाद् इव ।सुखं स्वपिति वास्ते वा यत्र तत्र गतोद्धवः ॥ ३८ ॥

13.39

तेषां हि सततं लोके विषयाण् अभिकाङ्क्षताम् ।संविन् नैवास्ति कार्पण्याच् छुनाम् आशावताम् इव ॥ ३९ ॥

13.40

विषयैर् इन्द्रियग्रामो न तृप्तिम् अधिगच्छति ।अजस्रं पूर्यमाणोऽपि समुद्रः सलिलैर् इव ॥ ४० ॥

13.41

अवश्यं गोचरे स्वे स्वे वर्तितव्यम् इहेन्द्रियैः ।निमित्तं तत्र न ग्राह्यम् अनुव्यञ्जनम् एव च ॥ ४१ ॥

13.42

आलोक्य चक्षुषा रूपं धातुमात्रे व्यवस्थितः ।स्त्री वेति पुरुषो वेति न कल्पयितुम् अर्हसि ॥ ४२ ॥

13.43

सचेत् स्त्रीपुरुषग्राहः क्व चिद् विद्येत कास् चन ।शुभतः केशदन्तादीन् नानुप्रस्थातुम् अर्हसि ॥ ४३ ॥

13.44

नापनेयं भूततो भूतं शश्वद् इन्दियगोचरे ।द्रष्टव्यं भूततो भूतं यादृषं च यथा च यत् ॥ ४४ ॥

13.45

एवं ते पश्यतस् तत्त्वं शश्वद् इन्द्रियगोचरे ।भविष्यति पदस्थानं नाभियादौर्मनस्ययोः ॥ ४५ ॥

13.46

अभिध्या प्रियरूपेण हन्ति कामात्मकं जगत् ।अरिर् मित्रमुखेनेव प्रियवाक्कलुषाशयः ॥ ४६ ॥

13.47

दौर्मनस्याभिधानस् तु प्रतिघो विषयाश्रितः ।मोहाद् येनानुवृत्तेन परत्रेह च हन्यते ॥ ४७ ॥

13.48

अनुरोधविरोधाभ्यां शितोष्णाभ्याम् इवार्दितः ।शर्म नाप्नोति न श्रेयश् चलेन्द्रिचम् अतो जगत् ॥ ४८ ॥

13.49

नेन्द्रियं विषये तावत् प्रवृत्तम् अपि सज्जते ।यावन् न मनसस् तत्र परिकल्पः प्रवर्तते ॥ ४९ ॥

13.50

इन्धने सति वायौ च यथा ज्वलति पावकः ।विषयात् परिकल्पाच् च क्लेशाग्निर् जायते तथा ॥ ५० ॥

13.51

अभूतपरिकल्पेन विषयस्य हि बध्यते ।तम् एव विषयं पश्यन् भूततः परिमुच्यते ॥ ५१ ॥

13.52

दृष्ट्वैकं रूपम् अन्यो हि रज्यतेऽन्यः प्रदुष्यति ।कश् चिद् भवति मध्यस्थस् तत्रैवान्यो घृणायते ॥ ५२ ॥

13.53

अतो न विषयो हेतुर् बन्धाय न विमुक्तये ।परिकल्पविषेषेण संगो भवति वा न वा ॥ ५३ ॥

13.54

कार्यः परमयत्नेन तस्माद् इन्दियसंवरः ।इन्द्रियाणि ह्य् अगुप्तानि दुःखाय च भवाय च ॥ ५४ ॥

13.55

कामभोगभोगवद्भिर् आमदृष्टिदृष्टिभिः प्रमादनैकमूर्धभिः प्रहर्षलोलजिवैः ।इन्द्रियोरगैर् मनोबिलशयैः स्पृहाविषैः शमागदा ऋते न दष्टम् अस्ति यच् चिकित्सेत् ॥ ५५ ॥

13.56

तस्माद् एषाम् अकुषलकराणाम् अरीणां चक्षुर्घ्राणश्रवञरसनस्पर्शनानाम् ।सर्वावस्थं भव विनियमाद् अप्रमत्तो मास्मिन्न् अर्थे क्षणम् अपि कृथास त्वं प्रमादं ॥ ५६ ॥

13.57

सौन्दरनन्दे महाकाव्ये शीलेन्द्रियजयो नाम त्रयोदशः सर्गः ।

14.head

चतुर्दशः सर्गः

14.1

अथ स्मृतिकवाटेन पिधायेन्द्रियसंवरम् ।भोजने भव मात्राज्ञो ध्यानायानामयाय च ॥ १ ॥

14.2

प्राणापानौ निगृह्णाति ग्लानिनिद्रे प्रयच्छति ।कृतो ह्य् अत्यर्थम् आहारो विहन्ति च पराक्रमम् ॥ २ ॥

14.3

यथा चात्यर्थम् आहारः कृतोऽनर्थाय कल्पते ।उपयुक्तस् तथात्यल्पो न सामर्थ्याय कल्पते ॥ ३ ॥

14.4

आचयं द्युतिम् उत्साहं प्रयोगं बलम् एव च ।भोजनं कृतम् अत्यल्पं शरीरस्यापकर्षति ॥ ४ ॥

14.5

यथा भारेण नमते लघुनोन्नमते तुला ।समा तिष्ठति युक्तेन भोज्येनेयं तथा तनुः ॥ ५ ॥

14.6

तस्माद् अभ्यवहर्तव्यं स्वशक्तिम् अनुपश्यता ।नातिमात्रं न चात्यल्पं मेयं मानवशाद् अपि ॥ ६ ॥

14.7

अत्याक्रान्तो हि कायाग्निर् गुरुणान्नेन शाम्यति ।अवच्छन् न इवाल्पोऽग्निः सहसा महतेन्धसा ॥ ७ ॥

14.8

अत्यन्तम् अपि संहारो नाहारस्य प्रशस्यते ।अनाहारो हि निर्वाति निरिन्धन इवानलः ॥ ८ ॥

14.9

यस्मान् नास्ति विनाहारात् सर्वप्राणभृतां स्थितिः ।तस्माद् दुष्यति नाहारो विकल्पोऽत्र तु वार्यते ॥ ९ ॥

14.10

न ह्य् एवक्विषयेऽन्यत्र सज्यन्ते प्राणिनस् तथा ।अविज्ञाते यथाहारे बोद्धव्यं तत्र कारणम् ॥ १० ॥

14.11

चिकित्सार्थं यथा धत्ते व्रणस्यालेपनं व्रणी ।क्षुद्विघातार्थम् आहारस् तद्वत् सेव्यो मुमुक्षुना ॥ ११ ॥

14.12

भारस्योद्वहनार्थं च रथाक्षोऽभ्यज्यते यथा ।भोजनं प्राणयात्रार्थं तद्वद् विद्वान् निषेवते ॥ १२ ॥

14.13

समतिक्रमणार्थं च कान्तारस्य यथाध्वगौ ।पुत्रमांसानि खादेतां दम्पती भृषदुःखितौ ॥ १३ ॥

14.14

एवम् अभ्यवहर्तव्यं भोजनं प्रतिसंख्यया ।न भूषार्थं न वपुषे न मदाय न दृप्तये ॥ १४ ॥

14.15

धारणार्थं शरीरस्य भोजनं हि विधियते ।उपस्तम्भः पिपतिषोर् दुर्बलस्येव वेश्मनः ॥ १५ ॥

14.16

प्लवं यत्नाद् यथा कश् चिद् बध्नीयाद् धारयेद् अपि ।न तत्स्नेहेन यावत् तु महौघस्योत्तीर्षया ॥ १६ ॥

14.17

तथोपकरणैः कायं धारयन्ति परिक्षकाः ।न तत्स्नेहेन यावत् तु दुःखौघस्य तितीर्षया ॥ १७ ॥

14.18

शोचता पीड्यमानेन दीयते शत्रवे यथा ।न भक्त्या नापि तर्षेन केवलं प्राणगुप्तये ॥ १८ ॥

14.19

योगाचारस् तथाहारं शरिराय पयच्छति ।केवलं क्षुद्विघातार्थं न रागेण न भक्तये ॥ १९ ॥

14.20

मनोधारणया चैव परिणाम्यात्मवान् अहः ।विधूय निद्रां योगेन निशाम् अप्य् अतिनामयेः ॥ २० ॥

14.21

हृर्दि यत्संज्ञिनश् चैव निद्रा प्रादुर्भवेत् तव ।गुणवत्संज्ञितां संज्ञां तदा मनसि मा कृथाः ॥ २१ ॥

14.22

धातुर् आरम्भधृत्योश् च स्थामविक्रमयोर् अपि ।नित्यं मनसि कार्यस् ते बाध्यमानेन निद्रया ॥ २२ ॥

14.23

आम्नातव्याश् च विशदं ते धर्मा ये परिश्रुताः ।परेभ्यश् चोपदेष्टव्याः संचिन्त्याः स्वयम् एव च ॥ २३ ॥

14.24

प्रक्लेद्यमद्भिर् वदनं विलोक्याः सर्वतो दिशः ।चार्या दृष्टिश् च तारासु जिजागरिषुणा सदा ॥ २४ ॥

14.25

अन्तर्गतैर् अचपलैर् वशस्थायिभिर् इन्द्रियैः ।अविक्षिप्तेन मनसा चङ्क्रम्यवास्व वा निशि ॥ २५ ॥

14.26

भये प्रीतौ च शोके च निद्रया नाभिभूयते ।तस्मान् निद्राभियोगेषु सेवितव्यम् इदं त्रयम् ॥ २६ ॥

14.27

भयम् आगमनान् मृत्योः प्रीतिं धर्मपरिग्रहात् ।जन्मदुःखाद् अपर्यन्ताच् छोकम् आगन्तुम् अर्हसि ॥ २७ ॥

14.28

एवमादि क्रमः सौम्य कार्यो जागरणं प्रति ।वन्ध्यं हि शयनाद् आयुः कः प्राज्ञः कर्तुम् अर्हति ॥ २८ ॥

14.29

दोषव्यालान् अतिक्रम्य व्यालान् गृहगतान् इव ।क्षमं प्राज्ञस्य न स्वप्तुं निस्तीर्षोर् महद्भयम् ॥ २९ ॥

14.30

प्रदीप्ते जीवलोके हि मृत्युव्याधिजराग्निभिः ।कः शयीत निरुद्वेगः प्रदीप्त इव वेश्मनि ॥ ३० ॥

14.31

तस्मात् तम इति ज्ञात्वा निद्रां नावेष्टुम् अर्हसि ।अप्रशान्तेषु दोषेषु सशस्त्रेष्व् इव शत्रुषु ॥ ३१ ॥

14.32

पूर्वं यामं त्रियामायाः प्रयोगेणातिनाम्य तु ।सेव्या शय्या शरीरस्य विश्रामार्थं स्वतन्त्रिणा ॥ ३२ ॥

14.33

दक्षिणेन तु पार्श्वेन स्थितयालोकसंज्ञया ।प्रबोधं हृदये कृत्वा शयीथाः शान्तमानसः ॥ ३३ ॥

14.34

यामे तृतीये चोत्थाय चरन्न् आसीन एव वा ।भूयो योगं महःशुद्धौ कुर्वीथा नियतेन्द्रियः ॥ ३४ ॥

14.35

अथासनगतस्थानप्रेक्षितव्याहृतादिषु ।संप्रजानन् क्रियाः सर्वाः स्मृतिम् आधातुम् अर्हसि ॥ ३५ ॥

14.36

द्वाराध्यक्ष इव द्वारि यस्य प्रणिहिता स्मृतिः ।धर्षयन्ति न तं दोषाः पुरं गुप्तम् इवारयः ॥ ३६ ॥

14.37

न तस्योत्पद्यते क्लेशो यस्य कायगता स्मृतिः ।चित्तं सर्वास्व् अवस्थासु बालं धात्रीव रक्षति ॥ ३७ ॥

14.38

शरव्यः स तु दोषाणां यो हीनः स्मृतिवर्मणा ।रणस्थः प्रतिशत्रूणां विहीन इव वर्मणा ॥ ३८ ॥

14.39

अनाथं तन् मनो ज्ञेयं यत् स्मृतिर् नाभिरक्षति ।निर्णेता दृष्टिरहितो विषमेषु चरन्न् इव ॥ ३९ ॥

14.40

अनर्थेषु प्रसक्ताश् च स्वार्थेभ्यश् च पराङ्मुखाः ।यद् भये सति नोद्विग्नाः स्मृतिनाशोऽत्र कारणम् ॥ ४० ॥

14.41

स्वभूमिषु गुणाः सर्वे ये च शीलादयः स्थिताः ।विकीर्णा इव गा गोपः स्मृतिस् तान् अनुगच्छति ॥ ४१ ॥

14.42

प्रनष्टम् अमृतं तस्य यस्य क्विप्रसृता स्मृतिः ।हस्तस्थम् अमृतं तस्य यस्य कायगता स्मृतिः ॥ ४२ ॥

14.43

आर्यो न्यायः कुतस् तस्य स्मृतिर् यस्य न विद्यते ।यस्यार्यो नास्ति च न्यायः प्रनष्टस् तस्य सत्पथः ॥ ४३ ॥

14.44

प्रनष्टो यस्य सन्मार्गो नष्टं तस्यामृतं पदम् ।प्रनष्टम् अमृतङ् यस्य स दुःखान् न विमुच्यते ॥ ४४ ॥

14.45

तस्माच् चरन् चरोऽस्मीति स्थितोऽस्मिति च धिष्ठितः ।एवमादिषु कालेषु स्मृतिम् आधातुम् अर्हसि ॥ ४५ ॥

14.46

यगानुलोमं विजनं विशब्दं शय्यासनं सौम्य तथा भजस्व ।कायस्य कृत्वा हि विवेकम् आदौ सुखोऽधिगन्तुं मनसो विवेकः ॥ ४६ ॥

14.47

अलब्धचेतःप्रशमः सरागो यो न प्रचारं भजते विविक्तम् ।स क्षण्यते ह्य् अपर्तिलब्धमार्गश् चरन्न् इवोर्यां बहुकण्टकायाम् ॥ ४७ ॥

14.48

अदृष्टतत्त्वेन परीक्षकेण स्थितेन चित्रे विषयप्रचारे ।चित्तं निषेद्धुं न सुखेन शक्यं कृश्टादको गौर् इव सस्यमध्यात् ॥ ४८ ॥

14.49

अनीर्यमाणस् तु यथानिलेन प्रशान्तिम् आगच्छति चित्रभानुः ।अल्पेन यत्नेन तथा विविक्तेष्व् अघट्टितं शान्तिम् उपैति चेतः ॥ ४९ ॥

14.50

क्व चिद् भुक्त्वा यत् तद् वसनम् अपि यत् तत् परिहितोवसन्न् आत्मारामः क्व चन विजने योऽभिरमते ।कृतार्थः सज् ञेयः शमसुखरसज्ञः कृतमतिःपरेषां संसर्गं परिहरति यः कण्टकम् इव ॥ ५० ॥

14.51

यदि द्वन्द्वारामे जगति विषयव्यग्रहृदयेविविक्ते निर्द्वन्दो विहरति कृती शान्तहृदयः ।ततः पीत्वा प्रज्ञारसम् अमृतवत् तृप्तहृदयोविविक्तः संसक्तं विषयकृपणं शोचति जगत् ॥ ५१ ॥

14.52

वसञ् शुण्यागारे यदि सततम् एकोऽभिरमतेयदि क्लेशोत्पादैः सह न रमते शत्रुभिर् इव ।चरन्न् आत्मारामो यदि च पिबति प्रीतिसलिलंततो भुङ्क्ते श्रेष्ठं त्रिदशपतिराज्याद् अपि सुखम् ॥ ५२ ॥

14.53

सौन्दरनन्दे महाकाव्य आदिप्रस्थानो नाम चतुर्दशः सर्गः ।

15.head

पञ्चदशः सर्गः

15.1

यत्र तत्र विविक्ते तु बद्ध्वा पर्यङ्कम् उत्तमम् ।ऋजुं कायं समाधाय स्मृत्याभिमुखयान्वितः ॥ १ ॥

15.2

नासाग्रे वा ललाटे वा भ्रुवोर् अन्तर एव वा ।कुर्वीथाश् चपलं चित्तम् आलम्बनपरायणम् ॥ २ ॥

15.3

सचेत् कामवितर्कस् त्वां धर्षयेन् मानसो ज्वरः ।क्षेप्तव्यो नाधिवास्यः स वस्त्रे रेणुर् इवागतः ॥ ३ ॥

15.4

यद्य् अपि प्रतिसंख्यानात् कामान् उत्सृष्टवान् असि ।तमांसीव प्रकाशेन प्रतिपक्षेण तात्र् जहि ॥ ४ ॥

15.5

तिष्ठत्य् अनुशयस् तेषां छन्नोऽग्निर् इव भस्मना ।स ते भावनया सौम्य प्रशाम्योऽग्निर् इवाम्बुना ॥ ५ ॥

15.6

ते हि तस्मात् प्रवर्तन्ते भूयो बीजाद् इवाङ्कुराः ।तस्य नाशेन ते न स्युर् बीजनाशाद् इवाङ्कुराः ॥ ६ ॥

15.7

अर्जनादीनि कामेभ्यो दृष्ट्वा दुःखानि कामिनाम् ।तस्मात् तान् मूलतश् छिन्धि मित्रसंज्ञान् अरीन् इव ॥ ७ ॥

15.8

अनित्या मोषधर्माणो रिक्ता व्यसनहेतवः ।बहुसाधारणाः कामा बर्ह्या ह्य् आशिविषा इव ॥ ८ ॥

15.9

ये मृग्यमाणा दुःखाय रक्ष्यमाणा न शान्तये ।भ्रष्टाः शोकाय महते प्राप्ताश् च न वितृप्तये ॥ ९ ॥

15.10

तृप्तिं वित्तप्रकर्षेण स्वर्गावाप्त्या कृतार्थताम् ।कामेभ्यश् च सुखोत्पत्तिं यः पश्यति स नश्यति ॥ १० ॥

15.11

चलान् अपरिनिष्पन्नान् असारान् अनवस्थितान् ।परिकल्पसुखान् कामान् न तान् स्मर्तुम् इहार्हसि ॥ ११ ॥

15.12

व्यापादो वा विहिंसा वा क्षोभयेद् यदि ते मनः ।प्रसाद्यं तद् विपक्षेन मणिनेवाकुलं जलम् ॥ १२ ॥

15.13

प्रतिपक्षस् तयोर् ज्ञेयो मैत्री कारुण्यम् एव च ।विरोधो हि तयोर् नित्यं प्रकाशतमसोर् इव ॥ १३ ॥

15.14

निवृत्तं यस्य दुःशील्यं व्यापादश् च प्रवर्तते ।हन्ति पांसुभिर् आत्मानां स स्नात इव वारणः ॥ १४ ॥

15.15

दुःखितेभ्यो हि मर्त्येभ्यो व्याधिमृत्युजरादिभिः ।आर्यः को दुःखम् अपरं सघृणो धातुम् अर्हति ॥ १५ ॥

15.16

दुष्टेन चेह मनसा बाध्यते वा परो न वा ।सद्यस् तु दह्यते तावत् स्वं मनो दुष्टचेतसः ॥ १६ ॥

15.17

तस्मात् सर्वेषु भूतेषु मैत्रीं कारुण्यम् एव च ।न व्यापादं विहिंसां वा विकल्पयितुम् अर्हसि ॥ १७ ॥

15.18

यद् यद् एव प्रसक्तं हि वितर्कयति मानवः ।अभ्यासात् तेन तेनास्य नतिर् भवति चेतसः ॥ १८ ॥

15.19

तस्माद् अस्कुशलं त्यक्त्वा कुशलं ध्यातुम् अर्हसि ।यत् ते स्याद् इह चार्थाय परमार्थस्य चाप्तये ॥ १९ ॥

15.20

संवर्धन्ते ह्य् अकुशला वितर्काः संभृता हृदि ।अनर्थजनकास् तुल्यम् आत्मनश् च परस्य च ॥ २० ॥

15.21

श्रेयसो विघ्नकरणाद् भवन्त्य् आत्मविपत्तये ।पात्रीभावोपघातात् तु परभक्तिविपत्तये ॥ २१ ॥

15.22

मनःकर्मस्व् अविक्षेपम् अपि चाभ्यस्तुम् अर्हसि ।न त्व् एवाकुशलं सौम्य वितर्कयितुम् अर्हसि ॥ २२ ॥

15.23

या त्रिकामोपभोगाय चिन्ता मनसि वर्तते ।न च तं गुणम् आप्नोति बन्धनाय च कल्पते ॥ २३ ॥

15.24

सत्त्वानाम् उपघाताय परिक्लेषाय चात्मनः ।मोहं व्रजति कालुष्यं नरकाय च वर्तते ॥ २४ ॥

15.25

तद्वितर्कैर् अकुशलैर् नात्मानं हन्तुम् अर्हसि ।सुशस्त्रं रत्नविकृतं मृद्धतो गां खनन्न् इव ॥ २५ ॥

15.26

अनभिज्ञो यथा जातं दहेद् अगुरु काष्ठवत् ।अन्यायेन मनुष्यत्वम् उपहन्याद् इदं तथा ॥ २६ ॥

15.27

त्यक्त्वा रत्नं यथा लोष्टं रत्नद्वीपाच् च संहरेत् ।त्यक्त्वा नैःश्रेयसं धर्मं चिन्तयेद् अशुभं तथा ॥ २७ ॥

15.28

हिमवन्तं यथा गत्वा विषं भुञ्जीत नौषधम् ।मनुष्यतं तथा प्राप्य पापं सेवेत नो शुभम् ॥ २८ ॥

15.29

तद् बुद्ध्वा प्रतिकषेण वितर्कं क्षेप्तुम् अर्हसि ।सूक्ष्मेण परिकीलेन किलं दार्वन्तराद् इव ॥ २९ ॥

15.30

वृध्द्यवृद्ध्योर् अथ भवेच् चिन्ता ज्ञातिजनं प्रति ।स्वभावो जीवलोकस्य परीक्ष्यस् तन्निवृत्तये ॥ ३० ॥

15.31

संसारे कृष्यमाणानां सत्त्वानां स्वेन कर्मणा ।को जनः स्वजनः को वा मोहात् सक्तो जने जनः ॥ ३१ ॥

15.32

अतीतेऽध्वनि संवृत्तः स्वजनो हि जनस् तव ।अप्राप्ते चाध्वनि जनः स्वजनस् ते भविष्यि ॥ ३२ ॥

15.33

विहगाना यथा सायं तत्र तत्र समागमः ।जातौ जातौ तथा श्लेषो जनस्य स्वजनस्य च ॥ ३३ ॥

15.34

परिश्रयं अभुविधं संश्रयन्ति यथाध्वगाः ।प्रातियान्ति पुनस् त्यक्त्वा तद्वज् ज्ञातिसमागमः ॥ ३४ ॥

15.35

लोके प्रकृतिभिन्नेऽस्मिन् न कश् चित् कस्य चित् प्रियः ।कार्यकारञसंबद्धं बालुकामुष्टिवज् जगत् ॥ ३५ ॥

15.36

बिभर्ति हि सुतं माता धरयिष्यति माम् इति ।मातरं भजते पुतृओ गर्भेणाधत्त माम् इति ॥ ३६ ॥

15.37

अनुकूलं प्रवर्तन्ते ज्ञातिषु ज्ञातयो यदा ।तदा स्नेहं प्रकुर्वन्ति रिपुत्वं तु विपर्ययात् ॥ ३७ ॥

15.38

अहितो दृष्यते ज्ञातिर् अज्ञातिर् हितः ।स्नेहं कार्यान्तराल् लोकश् छिनत्ति च करोति च ॥ ३८ ॥

15.39

स्वयम् एव यथालिक्य रज्येच् चित्रकरः स्त्रियम् ।तथा कृत्वा स्वयं स्नेहं संगमेति जने जनः ॥ ३९ ॥

15.40

योऽभवद् बान्धवजनः परलोके प्रियस् तव ।स ते कम् अर्थं कुरुते त्वं वा तस्मै करोषि कम् ॥ ४० ॥

15.41

तस्माज् ज्ञात्वितर्केण मनो नावेष्टुम् अर्हसि ।व्यवस्था नास्ति संसारे स्वजनस्य जनस्य च ॥ ४१ ॥

15.42

असौ क्षेमो जनपदः सुभिक्षोऽसाव् असौ शिवः ।इत्य् एवम् अथ जायेत वितर्कस् तव कश् चन ॥ ४२ ॥

15.43

प्रहेयः स त्वया सौम्य नाधिवास्यः कथं चन ।विदित्वा सर्वम् आदीप्तं तैस् तैर् दोषाग्निभिर् जगत् ॥ ४३ ॥

15.44

ऋतुचक्रनिवर्ताच् च क्षुत्पिपासाक्लमाद् अपि ।सर्वत्र नियतं दुःखं न क्व चिद् विद्यते शिवम् ॥ ४४ ॥

15.45

क्व चिच् छितं क्व चिद् धर्मः क्व चिद् रोगो भयं क्व चित् ।बाधतेऽभ्यधिकं लोके तस्माद् अशरणं जगत् ॥ ४५ ॥

15.46

जरा व्याधिश् च मृत्युश् च लोकस्यास्य महद्भयम् ।नास्ति देशः स यत्रास्य तद्भयं नोपपद्यते ॥ ४६ ॥

15.47

यत्र गच्छति कायोऽयं दुःखं तत्रानुगच्छति ।नास्ति का चिद् गतिर् लोके गतो यत्र न बाधय्ते ॥ ४७ ॥

15.48

रमणीयोऽपि देशः सन् दुभिक्षः क्षेम एव च ।कुदेश इति विज्ञेयो यत्र क्लेशैर् विधयते ॥ ४८ ॥

15.49

लोकस्याभ्याहत्स्यास्य दुःखैः शरीरमानसैः ।क्षेमः कश् चिन् न देशोऽस्ति स्वस्थो यत्र गतो भवेत् ॥ ४९ ॥

15.50

दुःखं सर्वत्र सर्वस्य वर्तते सर्वदा यदा ।छन्दरागम् अतः सौम्य लिकचित्रेषु मा कृथाः ॥ ५० ॥

15.51

यदा तस्मान् निवृत्तस् ते छन्दरागो भविष्यति ।जीवलोकं तदा सर्वम् आदीप्तम् इव मंस्यसे ॥ ५१ ॥

15.52

अथस् कश् चिद् वितर्कस् ते भवेद् अमरणाश्रयः ।यत्नेन स विहन्तव्यो व्याधिर् आत्मगतो यथा ॥ ५२ ॥

15.53

मुहूर्तम् अपि विश्रम्भः कार्यो न खलु जीविते ।निलीन इव हि व्याघ्रः कालो विश्वस्तघातकः ॥ ५३ ॥

15.54

बलस्थोऽहं युवा वेति न ते भवितुम् अर्हति ।मृत्युः सर्वास्व् अवस्थासु हन्ति नावेक्षते वयः ॥ ५४ ॥

15.55

क्षेत्रभूतम् अनर्थानां शरीरं परिकर्षतः ।स्वास्थ्याशा जिविताश वा न दृष्टार्थस्य जायते ॥ ५५ ॥

15.56

निवृतः को भवेत् कायं महाभूताश्रयं वहन् ।परस्परविरुद्धानाम् अहिनाम् इव भाजनम् ॥ ५६ ॥

15.57

प्रश्वसित्य् अयम् अन्वक्ष यद् उच्छ्वसिति मानवः ।अवगच्छ तद् आश्चर्यम् अविश्वास्यं हि जीवितम् ॥ ५७ ॥

15.58

इदम् आश्चर्यम् अपरं यत् सुप्तः प्रतिबुध्यते ।स्वपित्य् उत्थाय वा भूयो बह्वमित्रा हि देहिनः ॥ ५८ ॥

15.59

गर्भात् प्रभृति यो लोकं जिघांसुर् अनुगच्छति ।कस् तस्मिन् विश्वसेन् मृत्याव् उद्यतासाव् अराव् इव ॥ ५९ ॥

15.60

प्रसूतः पुरुषो लोके श्रुतवान् बलवान् अपि ।न जयत्य् अन्तकं कश् चिन् नाजयन् नापि जेष्यति ॥ ६० ॥

15.61

साम्ना दानेन भेदेन दण्डेन नियमेन वा ।प्राप्तो हि रभसो मृत्युः प्रतिहन्तुं न शक्यते ॥ ६१ ॥

15.62

तस्मान् नायुषि विश्वासं चञ्चले कर्तुम् अर्हसि ।नित्यं हरति कालो हि स्थाविर्यं न प्रतीक्षते ॥ ६२ ॥

15.63

निःसारं पश्यतो लोकं तोयबुद्बुददुर्बलम् ।कस्यामरवितर्को हि स्याद् अनुन्मत्तचेतसः ॥ ६३ ॥

15.64

तस्माद् एषां वितर्काणां प्रहाणार्थं समासतः ।आनापानस्मृतिं सौम्य विषयीकर्तुम् अर्हसि ॥ ६४ ॥

15.65

इत्य् अनेन प्रयोगेण काले सेवितुम् अर्हसि ।प्रतिपक्षान् वितर्काणां गदानाम् अगदान् इव ॥ ६५ ॥

15.66

सुवर्णहेतोर् अपि पांसुधावको विहाय पांसून् बृहतो यथादितः ।जहाति सूक्ष्मान् अपि तद्विशुद्धये विशोध्य हेमावयवान् नियच्छति ॥ ६६ ॥

15.67

विमोक्षहेतोर् अपि युक्तमानसो विहाय दोषा बृहतस् तथादितः ।जहाति सूक्ष्मान् अपि तद्विशुद्धये विशोध्य धर्मावयान् नियच्छति ॥ ६७ ॥

15.68

ऋएणाद्भिः शुद्धं कनकम् इह पांसुव्यवहितंयथाग्नौ कर्मारः पचति भृषम् आवर्तयति च ।तथा योगाचारो निपुञम् इह दोषव्यवहितंविशोध्य क्लेशेभ्यः शमयति मनः संक्षिपति च ॥ ६८ ॥

15.69

यथा च स्वच्छन्दाद् उपनयति कर्माश्रयसुखंसुवर्णं कर्मारो बहुंविधम् अलङ्कारविधिषु ।मनःशुद्धो भिक्षुर् वशगतम् अभिज्ञास्व् अपि तथाययथेच्छं यत्रेच्छं शमयति मनः प्रेरयति च ॥ ६९ ॥

15.70

सौन्दरनन्दे महाकाव्ये वितर्कप्रहाणो नाम पञ्चदशः सर्गः ।

16.head

षोडशः सर्गः

16.1

एवं मनोधारणया क्रमेण व्यपोह्य किं चित् समुपोह्य किं चित् ।ध्यानानि चत्वार्य् अधिगम्य योगी प्राप्नोत्य् अभिज्ञा नियमेन पञ्च ॥ १ ॥

16.2

ऋद्धिप्रवेकं च बहुप्रकारं परस्य चेतश् चरितावबोधम् ।अतीतजन्मस्मरणं च दीर्घं दिव्ये विशुद्धे श्रुतिचक्षुषी च ॥ २ ॥

16.3

अतःपरं तत्त्वपरीक्षणेन मनो दधात्य् आस्रवसंक्षयाय ।ततो हि दुःखप्रभृतीनि सम्यक् चत्वारि सत्यानि पदान्य् अवैति ॥ ३ ॥

16.4

बाधात्मकं दुःखम् इदं प्रसक्तं दुःखस्य हेतुः प्रभवात्मकोऽयम् ।दुःखक्षयो निःसरणात्मकोऽयं त्राणात्मकोऽयं प्रशमाय मार्गः ॥ ४ ॥

16.5

इत्य् आर्यसर्यान्य् अवबुध्य बुद्ध्या चत्वारि सम्यक् प्रतिविध्य चैव ।सर्वास्रवान् भावनयाभिभूय न जायते शान्तिम् अवाप्य भूयः ॥ ५ ॥

16.6

अबोधतो ह्य् अप्रतिवेधतश् च तत्त्वात्मकस्यास्य चतुष्टयस्य ।भावद् भवं याति न शान्तिम् एति संसारदोलाम् अधिरुह्य लोकः ॥ ६ ॥

16.7

तस्माज् जरादेर् व्यसनस्य मूलं समासतो दुःखम् अवैहि जन्म ।सर्वौषधीनाम् इव भूर् भवाय सर्वापदां क्षेत्रम् इदं हि जन्म ॥ ७ ॥

16.8

यज् जन्म रूपस्य हि सेन्द्रियस्य दुःखस्य तन् नैकविधस्य जन्म ।यः संभवश् चास्य समुच्छ्रयस्य मृत्योष् च रोगस्य च संभवः सः ॥ ८ ॥

16.9

सद् वाप्य् असद् वा विषमिश्रम् अन्नं यथा विनाशाय न धारणाय ।लोके तथा तिर्यग् उपर्यधो वा दुःखाय सर्वं न सुकुःआय जन्म ॥ ९ ॥

16.10

जरादयो नैकविधा परजानां सत्यां प्रवृत्तौ प्रभवन्त्य् अनर्थाः ।प्रवात्सु घोएष्व् अपि मारुतेषु न ह्य् अप्रसूतास् तरवश् चलन्ति ॥ १० ॥

16.11

आकासयोनिः पवनो यथा हि यथा शमीगर्भशयो हुताशः ।आपो यथान्तर्वसुधाशयाश् च दुःखं तथा चित्तशरीरयोनि ॥ ११ ॥

16.12

अपां द्रवत्वं कठिनत्वम् उर्व्या वायोश् चलत्वं ध्रुवम् औष्ण्यम् अग्नेः ।यथा स्वभावो हि तथा स्वभावो दुःखं शरीरस्य च चेतसश् च ॥ १२ ॥

16.13

काये सति व्याधिजरादि दुःखं क्षुत्तर्षवर्षोष्णहिमादि चैव ।रुपाश्रिते चेतसि सानुबन्धे शोकारतिक्रोधभयादि दुःखम् ॥ १३ ॥

16.14

प्रत्यक्षम् आलोक्य च जन्मदुःखं दुःखं तथातीतम् अपीति विद्धि ।यथा च तद् दुःखम् इदं च दुःखं दुःखं तथानागतम् अप्य् अवेहि ॥ १४ ॥

16.15

बीजस्वभावो हि यथेह दृष्टो भूतोऽपि भव्योऽपि तथानुमेयः ।प्रत्यक्षतश् च ज्वलनो यथोष्णो भूतोऽपि भव्योऽपि तथोष्ण एव ॥ १५ ॥

16.16

तन् नामरूपस्य गुणानुरूपं यत्रैव निर्वृत्ति उदारवृत्त ।तत्रैव दुःखं न हि तद्विमुक्तं दुःखं भविष्यत्य् अभवद् भवेद् वा ॥ १६ ॥

16.17

प्रवृत्तिदुःखस्य च तस्य लोके तृष्णादयो दोषगणा निमित्तम् ।नैवेष्वरो न प्रकृतिर् न कालो नापि स्वभावो न विधिर् यदृच्छा ॥ १७ ॥

16.18

ज्ञातव्यम् एतेन च कारणेन लोकस्य दोषेभ्य इति प्रवृत्तिः ।यस्मान् म्रियन्ते सरजस्तमस्का न जायते वीतरजस्त्मस्कः ॥ १८ ॥

16.19

इच्छाविषेशे सति तत्र तत्र यानासनादेर् भवति प्रयोगः ।यस्माद् अतस् तर्षवशत् तथैव जन्म प्रजानाम् इति वेदितव्यम् ॥ १९ ॥

16.20

सत्त्वान्य् अभिष्वङ्गवशानि दृष्ट्वा स्वजातिषु प्रीतिपराण्य् अतीव ।अभ्यासयोगाद् उपपादितानि तैर् एव दोषैर् इति तानि विद्धि ॥ २० ॥

16.21

क्रोधप्रहर्षादिभिर् आश्रयाणाम् उत्पद्यते चेह यथा विशेषः ।तथैव जन्मस्व् अपि नैकरूपो निर्वर्तते क्लेशकृतो विशेषः ॥ २१ ॥

16.22

दोषाधिके जन्मनि तीव्रदोष उत्पद्यते रागिणि तीव्ररागः ।मोहाधिके मोहबलाधिकश् च तदल्पदोषे च तदल्पदोषः ॥ २२ ॥

16.23

फलं हि यादृक् समवैति साक्षात् तदागमाद् बीजम् अवैत्य् अतीतम् ।अवेत्य बीजप्रकृतिं च साक्षाद् अनागतं तत्फलम् अभ्युपैति ॥ २३ ॥

16.24

दोषक्षयो जातिषु यासु यस्य वैराग्यतस् तासु न जायते सः ।दोषाशयस् तिष्ठति यस्य यत्र तस्योपपत्तिर् विवशस्य तत्र ॥ २४ ॥

16.25

तज् जन्मनो नैकविधस्य सौम्य तृष्णादयो हेतव इत्य् अवेत्य ।तांश् छिन्धि दुःखाद् यदि निर्मुमुक्षा कार्यक्षयः कारणसंक्षयाद् धि ॥ २५ ॥

16.26

दुःखक्षयो हेतुपरिक्षयाच् च शान्तनं शिवं साक्षिकुरुष्व धर्मम् ।तृष्णाविरागं लयनं निर्दोहं सनातनं त्राणम् अहार्यम् आर्यम् ॥ २६ ॥

16.27

यस्मिन् न जातिर् न जरा न मृत्युर् न व्याधयो नाप्रियसंप्रयोगः ।नेच्छाविपन्न प्रियविप्रयोगः क्षेमं पदं नैष्ठिकम् अच्युतं तत् ॥ २७ ॥

16.28

दीपो यथा निर्वृतिम् अभ्युपेतो नैवावनिं गच्छति नानतरिक्षम् ।दिशं न कां चिद् विदिषं न कां चित् स्नेहक्षयात् केवलम् एति शान्तिम् ॥ २८ ॥

16.29

एवं कृती निर्वृतिम् अभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।दिशं न कां चिद् विदिशं न कां चित् क्लेशक्षयात् केवलम् एति सान्तिम् ॥ २९ ॥

16.30

अस्याभ्युपायोऽधिन्गमाय मार्गः प्रज्ञात्रिकल्पः प्रशमद्विकल्पः ।स भावनीयो विधिवद् बुधेन शीले शुचौ त्रिपमुखे स्थितेन ॥ ३० ॥

16.31

वाक्कर्म सम्यक् सहकायकर्म यथावद् आजीवनयश् च शुद्धः ।इदं त्रयं वृत्तविधौ प्रवृत्तं शीलाश्रयं कर्मपरिग्रहाय ॥ ३१ ॥

16.32

सत्येषु दुःखादिषु दृष्टिर् आर्या सम्यग्वितर्कश् च पराक्रमश् च ।इदं त्रयं ज्ञानविधौ प्रवृत्तं प्रज्ञाश्रयं क्लेशपरिक्षयाय ॥ ३२ ॥

16.33

न्यायेन सत्याधिगमाय युक्ता सम्यक् स्मृतिः सम्यग् अथो समाधिः ।इदं द्वयं योगविधौ प्रवृत्तं शमाश्रयं चित्तपरिग्रहाय ॥ ३३ ॥

16.34

क्लेशाङ्कुरान् न प्रतनोति शीलं बीजाङ्कुरान् काल इवावृत्तः ।शुचौ हि शीले पुरुषस्य दोषा मनः सलज्जा इव धर्षयन्ति ॥ ३४ ॥

16.35

क्लेशांस् तु विष्कम्भयते समाधिर् वेगान् इवाद्रिर् महओत् नदीनाम् ।स्थिते समाधौ हि न धर्षयन्ति दोषा भुजङ्गा इव मन्त्रबद्धाः ॥ ३५ ॥

16.36

प्रज्ञा त्व् अशेषेण निहन्ति दोषांस् तीरद्रुमान् प्रावृषि निम्नगेव ।दग्धा यया न प्रभवन्ति दोषा वज्राग्निनेवानुसृतेन वृक्षाः ॥ ३६ ॥

16.37

त्रिस्कन्धम् एतं प्रविगाह्य मार्गं प्रस्पष्टम् अष्टाङ्गम् अहार्यम् आर्यम् ।दुःखस्य हेतून् प्रजहाति दोषान् प्राप्नोति चात्यन्तशिवं पदं तत् ॥ ३७ ॥

16.38

अस्योपचारे धृतिर् आर्जवं च ह्रीर् अप्रमादः प्रविविक्तता च ।अल्पेच्छता तुष्टिर् असंगता च लोकप्रवृत्ताव् अरतिः क्षमा च ॥ ३८ ॥

16.39

याथात्म्यतो विन्दति यो हि दुःखं तस्योद्भवं तस्य च यो निर्दोधम् ।आर्येण मार्गेण स सान्तिम् एति कल्याणमित्रैः सह वर्तमानः ॥ ३९ ॥

16.40

यो व्याधितो व्याधिम् अवैति सम्यग् व्याधेर् निदानं च तदौषधं च ।आरोग्यम् आप्नोति हि सोऽचिरेण मित्रैर् अभिज्ञैर् उपचर्यमाणः ॥ ४० ॥

16.41

तद् व्याधिसंज्ञां कुरु दुःखसत्ये दोषेष्व् अपि व्याधिनिदानसंज्ञाम् ।आरोग्यसंज्ञां च निर्दोहसत्ये भैषज्यसंज्ञाम् अपि मार्गसत्ये ॥ ४१ ॥

16.42

तस्मात् प्रवृत्तिं परिगच्छ दुःखं प्रवर्तकान् अप्य् अवगच्छ दोषान् ।निवृत्तिम् आगच्छ च तन्निरोधं निवर्तकं चाप्य् अवगच्छ मार्गम् ॥ ४२ ॥

16.43

शिरस्य् अथो वाससि संप्रदीप्ते सत्यावबोधाय मतिर् विचार्या ।दग्धं जगत् सत्यनयं ह्य् अदृष्ट्वा प्रदह्यते संप्रति धक्ष्यते च ॥ ४३ ॥

16.44

यदैव यः पश्यति नामरूपं क्षयीति तद्दर्शनम् अस्य सम्यक् ।सम्यक् च निर्वेदम् उपैति पश्यान् नन्दीक्षयाच् च क्षयम् एति रागः ॥ ४४ ॥

16.45

तयोश् च नन्दीरजसोः क्षयेण सम्यग् विमुक्तं प्रवदामि चेतः ।सम्यग् विमुक्तिर् मनसश् च ताभ्यां न चास्य भूयः करणीयम् अस्ति ॥ ४५ ॥

16.46

यथास्वभावेन हि नामरूपं तद् धेतुम् एवास्तगमं च तस्य ।विजानतः पश्यत एव चाहं ब्रवीमि सम्यक् क्षयम् आस्रवाणाम् ॥ ४६ ॥

16.47

तस्मात् परं सौम्य विधाय वीर्यं शीघ्रं घटस्व् आस्रवसंक्षयाय ।दुःखान् अनित्यांश् च निरात्मकांश् च धातून् विशेषेण परीक्षमाणाः ॥ ४७ ॥

16.48

धातून् हि षड् भूसलिलानलादीन् सामान्यतः स्वेन च लक्षणेन ।अवैति यो नान्यम् अवैति तेभ्यः सोऽत्यन्तिकं मोक्षम् अवैति तेभ्यः ॥ ४८ ॥

16.49

क्लेशप्रहाणाय च निश्चितेन कालोऽभ्युपायश् च परीक्षितव्यः ।योगोऽप्य् अकाले ह्य् अनुपायतश् च भवत्य् अनर्थाय न तद्गुणाय ॥ ४९ ॥

16.50

अजातवत्सां यदि गां दुहीत नैवाप्तुयात् क्षीरम् अकालदोही ।कालेऽपि वा स्यान् न पयो लभेत मोहेन शृङ्गाद् यदि गां दुहीत ॥ ५० ॥

16.51

आर्द्राच् च काष्ठा ज्वलनाभिकामो नैव प्रयत्नाद् अपि वह्निम् ऋच्छेत् ।काष्ठाच् च शुष्काद् अपि पात्गनेन नैवाग्निम् आप्नोत्य् अनुपाअपूर्वम् ॥ ५१ ॥

16.52

तद् देशकालौ विधिवत् परीक्ष्य योगस्य मात्राम् अपि चाभ्युपायम् ।बलाबले चात्मनि संप्रधार्य कार्याः प्रयत्नो न तु तद्विरुद्धः ॥ ५२ ॥

16.53

प्रग्राहकं यत् तु निमित्तम् उक्तम् उद्धन्यमाने हृदि तन् न सेव्यम् ।एवं हि चित्तं प्रशमं न याति [न वह्नि] ना वह्निर् इवेर्यमाणः

16.54

शमाय यत् स्यान् नियतं निमित्तं जातोद्धवे चेतसि तस्य कालः ।एवं हि चित्तं प्रशमं नियच्छेत् प्रदीप्यमानोऽग्निर् इवोदकेन ॥ ५४ ॥

16.55

शमावहं यन् नियतं निमित्तं सेव्यं न तच् चेतसि लीयमाने ।एवं हि भूयो लयमेति चित्तम् अनीर्यमाणोऽग्निर् इवाल्पसारः ॥ ५५ ॥

16.56

प्रग्राहकं यन् नियतं निमित्तं लयं गते चेतसि तस्य कालः ।क्रियासमर्थं हि मनस् तथा स्यान् मन्दायमानोऽग्निर् इवेन्धनेन ॥ ५६ ॥

16.57

औपेक्षिकं नापि निमित्तम् इष्टं लयं गते चेतसि सोद्धवे वा ।एवं हि तीव्रं जनयेद् अनर्थम् उपेक्षितो व्याधिर् इवातुरस्य ॥ ५७ ॥

16.58

यत् स्याद् उपेक्षानियतं निमित्तं साम्यं गते चेतसि तस्य कालः ।एवं हि कृत्याय भवेत् प्रयोगो रथो विधेयाश्व इव प्रयातः ॥ ५८ ॥

16.59

रागोद्धव्याकुलितेऽपि चित्ते मैत्रोपसंहारविधिर् न कार्यः ।रागात्मको मुह्यति मैत्रया हि सेन्हं कफक्षोभ इवोपयुज्य ॥ ५९ ॥

16.60

रागोद्धते चेतसि धैर्यम् एत्य निषेवितव्यं त्व् अशुभं निमित्तम् ।रागात्मको ह्य् एवम् उपैति शर्म कफात्मको रूक्षम् इवोपयुज्य ॥ ६० ॥

16.61

व्यापाददोषेण मनस्य् उदीर्णे न सेवितव्यं त्व् अशुभं निमित्तम् ।द्वेषात्मकस्य ह्य् अशुभा वधाय पित्तात्मनस् शीत इवोपचारः ॥ ६१ ॥

16.62

व्यापाददोषक्षुभिते तु चित्ते सेव्या अवपक्षोपनयेन मैत्री ।द्वेषात्मनो हि प्रशमाय मैत्री पित्तात्मनः शीत इवोपचराः ॥ ६२ ॥

16.63

मोहानुबद्धे मनसः प्रचारे मैत्राशुभा चैव भवत्य् अयोगः ।ताभ्यां हि संमोहम् उपैति भूयो वाय्वात्मको रूक्षम् इवोपनीय ॥ ६३ ॥

16.64

मोहात्मैकायां मन्सः प्रवृत्तौ सेव्यस् त्व् इदं प्रत्ययताविहारः ।मूढे मनस्य् एष हि शान्तिमार्गो वाय्वात्मके स्निग्ध इवोपचारः ॥ ६४ ॥

16.65

उल्कामुखस्तं हि यथा सुवर्णं सुवर्णकारो धमतीह काले ।काले परिप्रोक्षयते जलेन क्रमेण काले समुपेक्षते च ॥ ६५ ॥

16.66

दहेत् सुवर्णं हि धमन्न् अकाले जले क्षिपन् संशमयेद् अकाले ।न चापि सम्यक् परिपाकम् एनं नयेद् अकाले समुपेक्षमाणः ॥ ६६ ॥

16.67

संप्रग्रहस्य प्रशमस्य चैव तथैव काले समुपेक्षणस्य ।सम्यङ्निमित्तं मनसा त्व् अवेक्ष्यं नाशो हि यत्नोऽप्य् अनुपायपूर्वः ॥ ६७ ॥

16.68

इत्य् एवम् अन्यायनिवर्तनं च न्यायं च तस्मै सुगतो बभाषे ।भूयश् च तत् तच् चरितं विदित्वा वितर्कहानाय विधीन् उवाच ॥ ६८ ॥

16.69

यथा भिषक् पित्तकफानिलानां य एव कोपं समुपैति दोषः ।शमाय तस्यैव विधत्ते व्यधत्त दोषेषु तथैर्व बुद्धः ॥ ६९ ॥

16.70

एकेन कल्पेन सचेन् न हन्यात् स्वभ्यस्तभावाद् अशुभान् वितर्कान् ।ततो द्वितीयं क्रमम् आरभेत न त्व् एव हेयो गुणवान् प्रयोगः ॥ ७० ॥

16.71

अनादिकालोपचितात्मकत्वाद् बलीयसः क्लेशगणस्य चैव ।सम्यक्प्रयोगस्य च दुष्करत्वाच् छेत्तुं न शक्याः सहसा हि दोषाः ॥ ७१ ॥

16.72

अञ्व्या यथाण्या विपुलाणिर् अन्या निर्वाह्यते तद्विदुषा नरेण ।तद्वद् तद् एवाकुशलं निमित्तं क्षिपेन् निमित्तान्तरसेवनेन ॥ ७२ ॥

16.73

तथाप्य् अथाध्यात्मनवग्रहत्वान् नैवोपशाम्येद् अशुभो वितर्कः ।हेयः स तद्दोषपरीक्षणेन सश्वापदो मार्ग इवाध्वगेन ॥ ७३ ॥

16.74

यथा क्षुधार्तोऽपि विषेण पृक्तं जिजीविषुर् नेच्छति भोक्तुम् अन्नम् ।तथैव दोषावहम् इत्य् अवेत्य जहाति विद्वान् अशुभं निमित्तम् ॥ ७४ ॥

16.75

न दोषतः पश्यति यो हि दोषं कस् तं ततो वारयितुं समर्थः ।गुणं गुणे पश्यति यश् च यन्त्र स वार्यमाणोऽपि ततः प्रयाति ॥ ७५ ॥

16.76

व्यपत्रपन्ते हि कुलप्रसूता महःप्रचारैर् अशुभैः प्रवृत्तैः ।कण्ठे मनस्वीव युवा वपुष्मान् अचाक्षुषैर् अप्रयतैर् विषक्तैः ॥ ७६ ॥

16.77

निर्धूयमानास् त्व् अथ लेशतोऽपि तिष्ठेयुर् एवाकुशला वितर्काः ।कार्यान्तरैर् अध्ययनक्रियाद् यैः सेव्यो विधिर् विस्मरणाय तेषाम् ॥ ७७ ॥

16.78

स्वप्तव्यम् अप्य् एव विचक्षणेन कायक्लमो वापि निषेवितव्यः ।न त्व् एव संचिन्त्यम् असन्निमित्तं यत्रावसक्तस्य भवेद् अनर्थः ॥ ७८ ॥

16.79

यथा हि भीतो निशि तस्करेभ्यो द्वारं प्रियेभ्योऽपि न दातुम् इच्छेत् ।प्राज्ञस् तथा संहरति प्रयोगं समं शुभस्याप्य् अशुभस्य दोषैः ॥ ७९ ॥

16.80

एवंप्रकारैर् अपि यद्य् उपायैर् निवार्यमाणा न पराङ्मुखाः स्युः ।ततो यथास्थूलनिबर्हणेन सुवर्णदोषा इव ते प्रहेयाः ॥ ८० ॥

16.81

द्रुतप्रयाणप्रभृतींश् च तीक्ष्णात् कामप्रयोगात् परिखिद्यमानः ।यथा नरः संश्रयते तथैव प्राज्ञेन दोषेष्व् अपि वरितव्यम् ॥ ८१ ॥

16.82

ते चेद् अलब्धप्रतिपक्षभावा नैवोपआम्येयुर् असद्वितर्काः ।मुहूर्तम् अप्य् अप्रतिवध्यमाना गृहे भुजङ्गा इव नाधिवास्याः ॥ ८२ ॥

16.83

दन्तेऽपि दन्तं प्रणिधाय कामं ताल्वग्रम् उत्पीड्य च जिह्वयापि ।चित्तेन चित्तं प्ररिगृह्य चापि कार्यः प्रयत्नो न तु तेऽनुवृत्ताः ॥ ८३ ॥

16.84

किम् अत्र चित्रम् यदि वीतमोहो वनं गतः स्वस्थमना न मुह्येत् ।आक्षिप्यमाणो हृदि तन्निमित्तैर् न क्षोभ्यते यः स कृती स धीरः ॥ ८४ ॥

16.85

तद् आर्यसत्याधिगमाय पूर्वं विशोधयानेन नयेन मार्गम् ।यात्रागतः शत्रुविनिग्रहार्थं राजेव्य् लक्ष्मीम् अजितां जिगीषन् ॥ ८५ ॥

16.86

एतान्य् अरण्यान्य् अभितः शिवानि योगानुकूलान्य् अजनेरितानि ।कायस्य कृत्वा प्रविवेकमात्रं क्लेशप्रहाणाय भजस्व मार्गम् ॥ ८६ ॥

16.87

कौण्डिन्यननदकृमिलानिरुद्धास् तिष्योपसेनौ विमलोऽथ राधः ।बाष्पोत्तरौ धौतकिमोहराजौ कात्यायनद्रव्यपिनिन्दवत्साः ॥ ८७ ॥

16.88

भद्दालिभद्रायणसर्पदाससुभूतिगोदत्तसुजातवत्साः ।संग्रामजिद्भद्रजिदश्वजिच् च श्रोणश् च शोणश् च स कोटिकर्णः ॥ ८८ ॥

16.89

क्षेमाजितो नन्दकनन्दमाता वुपालिवागीशयशाओयशोदाः ।महाह्वयो वल्कलिराष्ट्रपालौ सुदर्शअनस्वागतमेघिकाश् च ॥ ८९ ॥

16.90

स कप्फिनः काश्यप औरुविल्वो महामहाकाश्यपतिष्यनन्दाः ।पूर्णश् च पूर्णश् च स पूर्णकश् च शोनापरान्तश् च स पूर्ण एव ॥ ९० ॥

16.91

शारद्वतीपुत्रसुबाहुचुन्दाः कोन्देयकाप्यभृगुकुण्ठधानाः ।सशैवलौ रेवतकौष्ठिलौ च मौद्गल्यगोत्रश् च गवां पतिश् च ॥ ९१ ॥

16.92

यं विक्रमं योगविधाव् अकुर्वंस् तम् एव शीघ्रं विधिवत् कुरुष्व ।ततः पदं प्राप्स्यसि तैर् अवाप्तं सुखावृतैस् त्वं निवतं नियतं यशश् च ॥ ९२ ॥

16.93

द्रव्यं यथा स्यात् कटुकं रसेन तच् चोपयुक्तं मधुरं विपाके ।तथैव वीर्यं कटुकं श्रमेण तस्यार्थसिद्ध्यै मधुरो विपाकः ॥ ९३ ॥

16.94

वीर्यं परं कार्यकृतौ हि मूलं वीर्याद् ऋते का चन नास्ति सिद्धिः ।उदेति वीर्याद् इह सर्वसंपन् निर्वीर्यता चेत् सकलश् च पाप्मा ॥ ९४ ॥

16.95

अलब्धस्यालाभो नियतम् उपलब्धस्य विगमस्तथैवात्मावज्ञा कृपञम् अधिकेभ्यः परिभवः ।तमो निस्तेजस्त्वं श्रुतिनियमतुष्टिव्युपरमोनृणां निर्वीर्याणां भवति विनिपातश् च भवति ॥ ९५ ॥

16.96

नयं श्रुत्वा शक्तो यद् अयम् अभिवृद्धिं न लभतेपरं धर्मं ज्ञात्वा यद् उपरि निवासं न लभते ।गृहं त्यक्त्वा मुक्तौ यद् अयम् उपशान्तिं न लभतेनिमित्तं कौसीद्यं भवति पुरुषस्यात्र न रिपुः ॥ ९६ ॥

16.97

अनिक्षिप्तोत्साहो यदि खनति गां वारि लभतेप्रसक्तं व्यामथ्नन् ज्वलनम् अरणिभ्यां जनयति ।प्रयुक्ता योगे तु ध्रुवम् उपलभन्ते श्रमफलंद्रुतं नित्यं यान्तो गिरिम् अपि हि भिन्दन्ति सरितः ॥ ९७ ॥

16.98

कृष्ट्वा गां परिपाल्य च श्रमशतैर् अश्नोति सस्यशारियंयत्नेन प्रविगाह्य सागरजलं रत्नश्रिया क्रीडति ।शत्रूणाम् अवधूय वीर्यम् इषुभिर् भुङ्क्ते नरेन्द्रश्रियंतद् वीर्यं कुरु शान्तये विनियतं वीर्ये हि सर्वर्द्धयः ॥ ९८ ॥

16.99

सौन्दरननदे महाकाव्य आर्यसत्यव्याख्यानो नाम षोडशः सर्गः ।

17.head

सप्तदशः सर्गः

17.1

अथैवम् आदेसितततत्त्वमार्गो नन्दस् तदा प्राप्तविमोक्षमार्गः ।सर्वेण भावेन गुरौ प्रणम्य क्लेशप्रहाणाय वनं जगाम ॥ १ ॥

17.2

तत्रावकाशं मृदुनीलशष्पं ददर्श सान्तं तरुषण्डवन्तम् ।निःशब्दया निम्नगयोपगूढं वैडूर्यनीलोदकया वहन्त्या ॥ २ ॥

17.3

स पादयोस् तत्र विधाय शौचं शुचौ शिवे श्रीमति वृक्षमूले ।मोक्षाय बद्ध्वा व्यवसायकषां पर्यङ्कम् अङ्कावहितम् बबन्ध ॥ ३ ॥

17.4

ऋजुं समग्रं प्रणिधाय कायं कावे स्मृतिं चाभिमुखीं विधाय ।सर्वेन्द्रियाण्य् आत्मनि संनिधाय स तत्र योगं प्रयतः प्रपेदे ॥ ४ ॥

17.5

ततः स तत्त्वं निखिलं चिकीषुर् मोक्षानुकूलांश् च विधींश् चिकीर्षन् ।ज्ञानेन लोक्येन शमेन चैव चचार चेतःपरिकर्मभूमौ ॥ ५ ॥

17.6

संधाय धैर्यं प्रणिधाय वीर्यं व्यपोह्य सक्तिं परिगृह्य शक्तिम् ।प्रशान्तचेता नियमस्थचेताः स्वस्थस् ततोऽभूद् विषयेष्व् अनास्थः ॥ ६ ॥

17.7

आतप्तबुद्धेः प्रहितात्मनोऽपि स्वभ्यस्तभावाद् अथ कामसंज्ञा ।पर्याकुलं तस्य मनश् चकार प्रावृट्सु विद्युज् अलम् आगतेव ॥ ७ ॥

17.8

स पर्यवस्थानम् अवेत्य सद्यश् चिक्षेप तां धर्मविघातकर्त्रीम् ।प्रियाम् अपि क्रोधपारितचेता नारीम् इवोद्धृत्तगुणां मनस्वी ॥ ८ ॥

17.9

आरब्धवीर्यस्य मनःशमाय भूयस् तु तस्याकुशलो वितर्कः ।व्याधिप्रणाशाय निविष्टबुद्धेर् उपद्रवो घोर इवाजगाम ॥ ९ ॥

17.10

स तद्विघाताय निमित्तम् अन्यद् योगानुकूलं कुशलं प्रपेदे ।आर्तायनं स्क्षीणबलो बल्स्थं निरस्यमानो बलिनारिणेव ॥ १० ॥

17.11

पुरं विधायानुविधाय दण्डं मित्राणि संगृह्य रिपून् विघृह्य ।राजा यथाप्नोति हि गाम् अपूर्वां नीतिर् मुकुक्षोर् अपि सैव योगे ॥ ११ ॥

17.12

विमोक्षकामस्य हि योगिनोऽपि मनः पुरं ज्णानविधिश् च दण्डः ।गुणाश् च मित्राण्य् अरयश् च दोषा भूमिर् विमुक्तिर् यतते यदर्थम् ॥ १२ ॥

17.13

स दुःखजालान् महतो मुकुक्षुर् विमोक्षमार्गाधिगमे विविक्षुः ।पन्थानम् आर्यं परमं दिदृक्षुः शमं ययौ किं चिद् उपात्तचक्षुः ॥ १३ ॥

17.14

यः स्यान् निकेतस् तमसोऽनिकेतः श्रुत्वापि तत्त्वं स भवेत् प्रमत्तः ।यस्मात् तु मोक्षाय स पात्रभूतस् तस्मान् मनः स्वात्मनि संजहार ॥ १४ ॥

17.15

संभारतः प्रत्ययतः स्वभावाद् आस्वादतो दोषविशेषतश् च ।अथात्मवान् निःसरणात्मतश् च धर्मेषु चक्रे विधिवत् परीक्षाम् ॥ १५ ॥

17.16

स रूपिणं कृत्स्नम् अरूपिणं च सारं दिदृक्षुर् विचिकाय कायम् ।अथाशुचिं दुःखम् अनित्यम् अस्वं निरात्मकं चैव चिकाय कायम् ॥ १६ ॥

17.17

अनित्यतस् तत्र हि शून्यतश् च निरात्मतो दुःखत एव चापि ।मार्गप्रवेकेण स लौकिकेन क्लेशद्रुमं संचलयां चकार ॥ १७ ॥

17.18

यस्माद् अभूत्वा भवतीह सर्वं भूत्वा च भूयो न भवत्य् अवश्यम् ।सहेकुतं च क्षयिहेतुमच् च तस्माद् अनित्यं जगद् इत्य् अविन्दत् ॥ १८ ॥

17.19

यतः प्रसूतस्य च कर्मयोगः प्रसज्यते बन्धविघातहेतुः ।दुःखप्रतीकारविधौ सुखाख्ये ततो भवं दुःखम् इति व्यपश्यत् ॥ १९ ॥

17.20

यतश् च संस्करागतं विविक्तं न कारकः कश् चन वेदको वा ।सामग्र्यथः संभवति प्रवृत्तिः शून्यं ततो लोकम् इमं ददर्श ॥ २० ॥

17.21

यस्मान् निरीहं जगद् अस्वतन्त्रं नैश्वर्यम् एकः कुरुते क्रियासु ।तत् तत् प्रतीत्य प्रभवन्ति भावा निरात्मकं तेन विवेद लोकम् ॥ २१ ॥

17.22

ततः स वातं व्यजनाद् इवोष्णे काष्ठाश्रितं निर्मथनाद् इवाग्निम् ।अन्तःक्षितिस्थं खननाद् इवाम्भो लोकत्तरं वर्तिम दुरापम् आप ॥ २२ ॥

17.23

सज्ज्ञानचापः स्मृतिवर्म बद्ध्वा विशुद्धशीलव्रतवाहनस्थः ।क्लेशारिभिश् चित्तरणाजिरस्थैः सार्धं युयुस्त्सुर् विजयाय तस्थौ ॥ २३ ॥

17.24

ततः स बोध्यङ्गशितात्तशस्त्रः सम्यक्प्रधानोत्तमवाहनस्थः ।मार्गाङ्गमातङ्गवता बलेन शनैः शनैः क्लेशचुमूं जगाहे ॥ २४ ॥

17.25

स स्मृत्युपस्थानमयैः पृषत्कैः शत्रून् विपर्यासमयान् क्षणेन ।दुःखस्य हेतूंश् चतुरश् चतुर्भिः स्वैः स्वैः प्रचारायतनैर् ददार ॥ २५ ॥

17.26

आर्यैर् बलैः पञ्चभिर् एव पञ्च चेतःखिलान्य् अप्रतिमैर् बभञ्ज ।मिथ्याञ्गनागांश् च तथाङ्गनागैर् विनिर्दुधावाष्टभिर् एव सोऽष्टौ ॥ २६ ॥

17.27

अथात्मदृष्टिं सकलां विधूय चतुर्षु सत्येष्व् अकथं कथः सन् ।विशुद्धशीलव्रतदृष्टधर्मा धर्मस्य पूर्वां फलभूमिम् आप ॥ २७ ॥

17.28

स दर्शनाद् आर्यचतुष्टयस्य क्लेशैकदेशस्य च विप्रयोगात् ।प्रत्यात्मिकाच् चापि विशेषलाभात् प्रत्यक्षतो ज्ञानिसुखस्य चैव ॥ २८ ॥

17.29

दाढ्र्यात् प्रसादस्य धृतेः स्थिरत्वात् सत्येष्व् असंमूढतया चतुर्षु ।शीलस्य चाच्छिद्रतयोत्तमस्य निःसंशयो धर्मविधौ बभूव ॥ २९ ॥

17.30

कुदृष्टिजालेन स विप्रयुक्तो लोकं तथाभूतम् अवेक्षमाणः ।ज्ञानाश्रयां प्रीतिम् उपाजगाम भूयः प्रसादं च गुराव् इयाय ॥ ३० ॥

17.31

यो हि प्रवृत्तिं नियताम् अवैति नैवान्यहेतोर् इह नाप्य् अहेतोः ।प्रतीत्य तत् तत् समवैति तत् तत् स नैष्ठिकं पश्यति यश् च धर्मम् । तस्योपदेष्टारम् अथार्यवर्यं स प्रेक्षते बुद्धम् अवाप्तचक्षुङ् ॥ ३२ ॥

17.32

यथोपदेशेन शिवेन मुक्तो रोगाद् अरोगो भिषजं कृतज्ञः ।अनुस्मरन् पश्यति चित्तदृष्ट्या मैत्र्या च शास्त्रज्ञतया च तुष्टः ॥ ३३ ॥

17.33

आर्येण मार्गेण तथैव मुक्तस् तथागतं तत्त्वविद् आर्यतत्त्वः ।अनुस्मरन् पश्यति कायसाक्षी मैत्र्या च सर्वज्ञतया च तुष्टः ॥ ३४ ॥

17.34

स नाशकैर् दृष्टिगतैर् विमुक्तः पर्यन्तम् आलोक्य पुनर्भवस्य ।भक्त्वा घृणां क्लेशविजृम्भितेषु मृत्योर् न तत्रास न दुर्गतिभ्यः ॥ ३५ ॥

17.35

त्वक्स्नायुमेदोर्दुहिरास्थिमांसकेशादिनामेध्यगणेन पूर्णम् ।ततः स कायं समवेक्षमाणः सारं विचिन्त्याण्व् अपि नोपलेभे ॥ ३६ ॥

17.36

स कामरागप्रतिघौ स्थिरात्मा तेनैव योगेन तनू चकार ।कृत्वा महोरस्कतनुस् तनू तौ प्राप द्वितीयं फलम् आर्यधर्मे ॥ ३७ ॥

17.37

स लोभचापं परिकल्पबाणं रागं महावैरिणम् अल्पशेषम् ।कायस्वभावाधिगतैर् बिभेद योगायुधास्त्रैर् अशुभापृषत्कैः ॥ ३८ ॥

17.38

द्वेषायुधं क्रोधविकीर्णबाणं व्यापादम् अन्तःप्रसवं सपत्नम् ।मैत्रीपृषत्कैर् धृतितूणसंस्थैः क्षमाधनुर्ज्याविसृतैर् जघान ॥ ३९ ॥

17.39

मूलान्य् अथ त्रीण्य् आसुधस्य वीरस् त्रिभिर् विमोक्षायतनैश् चकर्त ।चमूमुखस्थान् धृतकार्मुकांस् त्रीन् अरीन् इवारिस् त्रिभिर् आयसाग्रैः ॥ ४० ॥

17.40

स कामधातोः सम्तिक्रमाय पार्ष्णिग्रहांस् तान् अभिभूय शत्रून् ।योगाद् अनागामिफलं प्रपद्य द्वारीव निर्वाञपुरस्य तस्थौ ॥ ४१ ॥

17.41

कामैर् विकितं मलिनैश् च धर्मैर् वितर्कवच् चापि विचारवच् च ।विवेकजं प्रीतिसुखोपपन्नं ध्यानं ततः स प्रथमं प्रपेदे ॥ ४२ ॥

17.42

कामाग्निधाहेन स विप्रमुक्तो ह्लादं परं ध्यानसुखाद् अवाप ।सुखं विगाह्याप्स्व् इव घर्मखिन्नः प्राप्येव चार्थं चिपुलं दरिद्रः ॥ ४३ ॥

17.43

तत्रापि तद्धर्मगतान् वितर्कान् गुणागुणे च प्रसृतान् विचारान् ।बुद्ध्वा मनःक्षोभकरान् अशान्तांस् तद्विप्रयोगाय मतिं चकार ॥ ४४ ॥

17.44

क्षोभं प्रकुर्वन्ति यथोर्मयो हि धीरप्रसन्नाम्बुवहस्य सिन्धोः ।एकाग्रभूतस्य तह्तोर्मिभूताश् चित्ताम्भसः क्षोभकरा वितर्काः ॥ ४५ ॥

17.45

खिन्नस्य सुप्तस्य च निर्वृतस्य बाधं यथा संजनयन्ति शब्दाः ।अध्यात्मम् ऐकाग्र्यम् उपागतस्य भवन्ति बाधाय तथा वितर्काः ॥ ४६ ॥

17.46

अथावितर्कं क्रमशोऽविचारम् एकाग्रभावान् मनसः प्रसन्नम् ।समाधिजं प्रीत्सुखं द्वितीयं ध्यानं तद् आध्यात्मशिवं स दध्यौ ॥ ४७ ॥

17.47

तद् ध्यानम् आगम्य च चित्तमौनं लेभे परां प्रीतिम् अलब्धपूर्वाम् ।प्रीतौ तु तत्रापि स दोषदर्शी यथा वितर्केष्व् अभवत् तथैव ॥ ४८ ॥

17.48

प्रीतिः परा वस्तुनि यत्र यस्य विपर्ययात् तस्य हि तर दुःखम् ।प्रीताव् अतः प्रेक्ष्य स तत्र दोषान् प्रीतिक्षये योगम् उपारुरोह ॥ ४९ ॥

17.49

प्रीतेद्र् विरागात् सुखम् आर्यजुष्टं कायेन विन्दन्न् अथ संप्रजानन् ।उपेक्षकः स स्मृतिमान् व्यहार्षीद् ध्यानं तृतीयं प्रतिलभ्य धीरः ॥ ५० ॥

17.50

यस्मात् परं तत्र सुखं सुखेभ्यस् ततः परं नास्ति सुखप्रवृत्तिः ।तस्माद् बभाषे शुभकृत्स्नभूमिं परापरज्ञः परमेति मैत्र्या ॥ ५१ ॥

17.51

ध्यानेऽपि तत्राथ ददर्श दोषं मेने परं शान्तम् अनिञ्जम् एव ।आभोगतोऽपीञ्जयति स्म तस्य चित्तं प्रवृत्तं सुखम् इत्य् अजस्रम् ॥ ५२ ॥

17.52

यत्रेञ्जितं स्पन्दितम् अस्ति तत्र यत्रास्ति च स्पन्दितम् अस्ति दुःखम् ।यस्माद् अतस् तत् सुखम् इञ्जकत्वात् प्रशान्तिकामा यतयस् त्यजन्ति ॥ ५३ ॥

17.53

अथ प्रहाणात् सुखदुःखयोश् च मनोविकारस्य च पूर्वम् एव ।दध्याव् उपेक्षामृतिमद् विशुद्धं ध्यानं तथादुःखसुखं चतुर्थम् ॥ ५४ ॥

17.54

यस्मात् तु तस्मिन् न सुखं न दुःखं ज्ञानं च तत्रास्ति तद् अर्थचारि ।तस्माद् उपेक्षास्मृतिपारिशुद्धिर् निरुच्यते ध्यानविधौ चतुर्थे ॥ ५५ ॥

17.55

ध्यानं स निश्रित्य ततश् चतुर्थम् अर्हत्त्वलाभाय मतिं चकार ।संधाय मैत्रं बलवन्तम् आर्यं राजेव देशान् अजितान् जिगीषुः ॥ ५६ ॥

17.56

चिच्छेद कात्स्न्र्येन ततः स पञ्च प्रज्ञासिना भावनयेरितेन ।ऊर्ध्वङ्गमान्य् उत्तमबन्धनानि संयोजनान्य् उत्तमबन्धनानि ॥ ५७ ॥

17.57

बोध्यङ्गनागैर् अपि सप्तभिः स सप्तैव चित्तानुशयान् ममर्द ।द्वीपान् इवोपस्थितविप्रणाशान् कालो ग्रहैः सप्तभिर् एव सप्त ॥ ५८ ॥

17.58

अग्निद्रुमाज्याम्बुषु या हि वृत्तिः कवन्धवाव्यग्निदिवाकराणाम् ।दोषेषु तां वृत्तिम् इयाय नन्दो निर्वापणोत्पाटनदाहशोषैः ॥ ५९ ॥

17.59

इति त्रिवेगं त्रिझषं त्रिवीचम् एकाम्भसं पञ्चरयं द्विकूलम् ।द्विग्राहम् अष्टाङ्गवता प्लवेन दुःखार्णवं चुस्तरम् उत्ततार ॥ ६० ॥

17.60

अर्हत्त्वम् आसाद्य स सत्क्रियार्हो निरुत्सुको निष्प्रणयो निराशः ।विभीर् विषुग् वीतमदो विरागः स एव धृत्यान्य इवाबभासे ॥ ६१ ॥

17.61

भ्रातुश् च शास्तुश् च तयानुशिष्ट्या नन्दस् ततः स्वेन च विक्रमेण ।प्रशान्तचेताः परिपूर्णकार्यो वाणीम् इमाम् आत्मगतां जगाद ॥ ६२ ॥

17.62

नमोऽस्तु तस्मै सुगताय येन हितैषिणा मे करुणत्मकेन ।बहूनि दुःखान्य् अपवर्तितानि सुखानि भूयांस्य् उपसंहृतानि ॥ ६३ ॥

17.63

अहं ह्य् अनार्येण शरीरजेन दुःखात्मके वर्त्मनि कृष्यमाणः ।निवर्तितस् तद्वचनाङ्कुषेन दर्पान्वितो नाग इवाङ्कुशेन ॥ ६४ ॥

17.64

तस्याज्ञया कारुणिकस्य शास्तुर् हृदिस्थम् उत्पाट्य हि रागशल्यम् ।अद्यैव तावत् सुमहत् सुखं मे सर्वक्षये किं बत निर्वृतस्य ॥ ६५ ॥

17.65

निर्वाप्य कामाग्निम् अहं हि दीप्तं धृत्यम्बुना पावकम् अम्बुनेव ।ह्लादं परं सांप्रतम् आगतोऽस्मि शीतं ह्रदं घर्म इवावतीर्णः ॥ ६६ ॥

17.66

न मे प्रियं किं चन नाप्रियं मे न मेऽनुरोधोऽस्ति कुतो विरोधः ।तयोर् अभावात् सुखितोऽस्मि सद्यो हिमातपाभ्याम् इव विप्रमुक्तः ॥ ६७ ॥

17.67

महाभयात् क्षेमम् इवोपलभ्य महावरोधाद् इव विप्रमोक्षम् ।महार्णवात् पारम् इवाप्लवः सन् भीमान्धकाराद् इव च प्रकाशम् ॥ ६८ ॥

17.68

रोगाद् इवारोग्यम् असह्यरूपाद् ऋणाद् इवानृण्यम् अनन्तसंख्यात् ।द्विषत्सकाशद् इव चापयानं दुर्भिक्षयोगाच् च यथा सुभिक्षम् ॥ ६९ ॥

17.69

तद्वत् परां शान्तिम् उपागतोऽहं यस्यानुभावेन विनायकस्य ।करोमि ब्ःऊयः पुनर् उक्तम् अस्मै नमो नमोऽर्हाय तथागताय ॥ ७० ॥

17.70

येनाहं गिरिम् उपनीय रुक्मशृङ्गं स्वर्गं च प्लवगवधूनिदर्शनेन ।कामात्मा त्रिदिवचरीभिर् अङ्गनाभिर् निष्कृष्टो युवतिमये कलौ निमग्नः ॥ ७१ ॥

17.71

तस्माच् च व्यसनपराद् अनर्थपङ्काद् उत्कृष्य क्रमशिथिलः करीव पङ्कात् ।शान्तेऽस्मिन् विरजसि विज्वरे विशोके सद्धर्मे वितमसि नैष्ठिके विमुक्तः ॥ ७२ ॥

17.72

तं वन्दे परम् अनुकम्पकं महर्षिं मूर्ध्नाहं प्रकृतिगुणज्ञम् आशयज्ञम् ।संबुद्धं दशबलिनं भिषक्प्रधानं त्रातारं पुनर् अपि चास्मि संनतस् तम् ॥ ७३ ॥

17.73

महाकाव्ये सौन्दरनन्देऽमृताधिगमो नाम सप्तदशः सर्गः ।

18.head

अष्टादशः सर्गः

18.1

अथ द्विजो बाल इवाप्तवेदः क्षिप्रं वणिक् प्राप्त इवाप्तलाभः ।जित्वा च राजन्य इवारिसैन्यं नन्दः कृतार्थो गुरुम् अभ्यगच्छत् ॥ १ ॥

18.2

द्रष्टुं सुखं ज्ञानसमाप्तिकाले गुरुर् हि शिष्यस्य गुरोश् च शिष्यः ।परिश्रमस् ते सफलो मयीति यतो दिदृक्षास्य मुनौ बभूव ॥ २ ॥

18.3

यतो हि येनाधिगतो विशेषस् तस्योत्तमाङ्गेऽर्हति कर्तुमिज्याम् ।आर्यः सरागोऽपि कृतज्ञभावात् प्रक्षीणमानः किमु वीतरागः ॥ ३ ॥

18.4

यस्यार्थकामप्रभवा हि भक्तिस् ततोऽस्य सा तिष्ठति रूढमूला ।धर्मान्वयो यस्य तु भक्तिरागस् तस्य प्रसादो हृदयावगाढः ॥ ४ ॥

18.5

काषायवासाः कनकावदातस् ततः स मूर्ध्ना गुरवे प्रणेमे ।वातेरितः पल्लवताम्ररागः पुष्पोज्ज्वलश्रीर् इव कर्णिकारः ॥ ५ ॥

18.6

अथात्मनः शिष्यगुणस्य चैव महामुनेः शास्तृगुणस्य चैव ।संदर्शनार्थं स न मानहेतोः स्वां कार्यसिद्धिं कथयां बभूव ॥ ६ ॥

18.7

या दृष्टिशल्यो हृदयावगाढः प्रभो भृशं माम् अतुदत् सुतीक्ष्णः ।त्वद्वाक्यसंदंशमुखेन मे स समुद्धृतः शल्यहृतेव शल्यः ॥ ७ ॥

18.8

कथङ्कथाभावगतोऽस्मि येन छिन्नः स निःसंशय संशयो मे ।त्वच्छासनात् सत्पथम् आगतोऽस्मि सुदेशिकस्येव पथि प्रनष्टः ॥ ८ ॥

18.9

यत् पीतम् आस्वादवशेन्द्रियेण दर्पेण कन्दर्पविषं मयासीत् ।तन् मे हतं त्वद्वचनागदेन विषं विनाशीव महागदेन ॥ ९ ॥

18.10

क्षयं गतं जन्म निरस्तजन्मन् सद्धर्मचर्याम् उषितोऽस्मि सम्यक् ।कृत्स्नं कृतं मे कृतकार्य कार्यं लोकेषु भूतोऽस्मि न लोकधर्मा ॥ १० ॥

18.11

मैत्रीस्तनीं व्यञ्जनचारुसास्नां सद्धर्मदुग्धां प्रतिभानशृङ्गाम् ।तवास्मि गां साधु निपीय तृप्तस् तृषेव गाम् उत्तमवत्सवर्णः ॥ ११ ॥

18.12

यत् पश्यतश् चाधिगमो ममायं तन् मे समासेन मुने निबोध ।सर्वज्ञ कामं विदितम् तवैतत् स्वं तूपचरां प्रविवक्षुर् अस्मि ॥ १२ ॥

18.13

अन्येऽपि सन्तो विमुमुक्षवो हि श्रुत्व विमोक्षाय नयं परस्य ।मुक्तस्य रोगाद् इव रोगवन्तस् तेनैव मार्गेण सुखं घटान्ते ॥ १३ ॥

18.14

उर्व्यादिकान् जन्मनि वेद्मि धातून् नात्मानम् उर्व्यादिषु तेषु किं चित् ।यस्माद् अतस् तेषु न मेऽस्ति सक्तिर् बहिश् च कायेन समा मतिर् मे ॥ १४ ॥

18.15

स्कन्धांश् च रूपप्रभृतीन् दशार्धान् पश्यामि यस्माच् चपलान् असारान् ।अनात्मकांश् चैव वधात्मकांश् च तस्माद् विमुक्तोऽस्म्य् अशिवेभ्य एभ्यः ॥ १५ ॥

18.16

यस्माच् च पश्याम्य् उदयं व्ययं च सर्वास्व् अवस्थास्व् अहम् इन्द्रियाणाम् ।तस्माद् अनित्येषु निरात्मकेषु दुःखेषु मे तेष्व् अपि नास्ति संगः ॥ १६ ॥

18.17

यतश् च लोकं सम्जन्मनिष्ठं पश्यामि निःसारम् असच् च सर्वम् ।अतो धिया मे मनसा विबद्धम् अस्मीति मे नेञ्जितम् अस्ति येन ॥ १७ ॥

18.18

चतुर्विधे नैकविधप्रसंगे यतोऽहम् आहारवैधाव् असक्तः ।अमूर्छितश् चाग्रथितश् च तत्र त्रिभ्यो विमुक्तोऽस्मि ततो भवेभ्यः ॥ १८ ॥

18.19

अनिश्रितश् चाप्रतिबद्धचित्तो दृष्टशुतादौ व्यवहारधर्मे ।यस्मात् समात्मानुगतश् च तत्र तस्माद् विसंयोगगतोऽस्मि मुक्तः ॥ १९ ॥

18.20

इत्य् एवम् उक्त्वा गुरुबाहुमान्यात् सर्वेण कायेन स गां निपन्नः ।प्रवेरितो लोहितचन्दनाक्तो हैमो महास्तम्भ इवाभासे ॥ २० ॥

18.21

ततः प्रमादात् प्रसृतस्य पूर्वं श्रुत्वा धृतिं व्याकरणं च तस्य ।धर्मान्वियं चानुगतं प्रसादं मेघस्वरस् तं मुनिर् आबभाषे ॥ २१ ॥

18.22

उत्तिष्ठ धर्मे स्थित शिष्यजुष्टे किं पादयोर् मे पतितोऽसि मूर्ध्ना ।अभ्यर्चनं मे न तथा प्रणामो धर्मे यथैषा प्रतिपत्तिर् एव ॥ २२ ॥

18.23

अद्यासि सुप्रव्रजितो जितात्मन्न् ऐश्वर्यम् अप्य् आत्मनि येन लब्धम् ।जितात्मनः प्रव्रजनं हि साधु चलात्मनो न त्व् अजितेन्द्रियस्य ॥ २३ ॥

18.24

अद्यासि शौचेन परेण युक्तो वाक्कायचेतांसि शुचीनि यत् ते ।अतः पुनश् चाप्रयताम् असौम्यां यत् सौम्य नो वेक्ष्यसि गर्भशय्याम् ॥ २४ ॥

18.25

अद्यार्थवत् ते श्रुतवच् छ्रुतं तच् छ्रुतानुरूपं प्रतिपद्य धर्मम् ।कृतश्रुतो विप्रतिपद्यमानो निन्द्यो हि निर्वीर्य इवात्तशस्त्रः ॥ २५ ॥

18.26

अहो धृतिस् तेऽविषयात्मकस्य यत् त्वं मतिं मोक्षविधाव् अकार्षीः ।यास्यामि निष्ठाम् इति बालिशो हि जन्मक्षयात् त्रासम् इहाभ्युपैति ॥ २६ ॥

18.27

दिष्ट्या दुरापः क्षणसंनिपातो नायं कृतो मोहवशेन मोघः ।उदेति दुःखेन गतो ह्य् अधस्तात् कूर्मो युगच्छिद्र इवार्ण्वस्थः ॥ २७ ॥

18.28

निर्जित्य मारं युधि दुर्निवारम् अद्यासि लोके रणशीर्षूरः ।शूरोऽप्य् आसूरः स हि वेदितव्यो दोषैर् अमित्रैर् इव हन्यते यः ॥ २८ ॥

18.29

निर्वाप्य रागाग्निम् उदीर्णम् अद्यासि लोके रणशीर्षशूरः ।दुःखं हि शेते शयनेऽप्य् उदारे क्लेशाग्निना चेतसि धयमानः ॥ २९ ॥

18.30

अभ्युच्छ्रितो द्रव्यमदेन पूर्वम् अद्यासि तृष्नोपरमात् समृद्धः ।यावत् सतर्षः पुरुषो हि लोके तावत् समृद्धोऽपि सदा दरिद्रः ॥ ३० ॥

18.31

अद्यापदेष्टुं तव युक्तरूपं शुद्धोधनो मे नृपतिः पितेति ।भ्रष्टस्य धर्मात् पितृभिर् निपाताद् अश्लाघनियो हि कुलापदेशः ॥ ३१ ॥

18.32

दिष्ट्यासि शान्तिं परमाम् उपेतो निस्तीर्णकान्तार इवाप्तसारः ।सर्वो हि संसारगतो भयार्तो यथैव कान्तारगतस् तथैव ॥ ३२ ॥

18.33

आरण्यकं क्भैक्षचरं विनीतं द्क्रष्यामि नन्दं निभृतं कदेति ।आसीत् पुरस्तात् त्वयि मे दिदृक्षा तथासि दिष्ट्या मम दर्शनीयः ॥ ३३ ॥

18.34

भवत्य् अरूपोऽपि हि दर्शनीयः स्वलङ्कृतः श्रेष्ठतमैर् गुणैः स्वैः ।दोषैः परीतो मलिनीकरैस् तु सुदर्शनीयोऽपि विरूप एव ॥ ३४ ॥

18.35

अद्य प्रकृष्ता तव बुद्धिमत्ता कृत्स्नं यया ते कृतम् आत्मकार्यम् ।श्रुतोन्नतस्यापि हि नास्ति बुद्धिर् नोत्पद्यते श्रेयसि यस्य बुद्धिः ॥ ३५ ॥

18.36

उन्मीलितस्यापि जनस्य मध्ये निमीलितस्यापि तथैव चक्षुः ।प्रज्ञामयं यस्य हि नास्ति चक्षुश् चक्षुर् न तस्यास्ति सचक्षुषोऽपि ॥ ३६ ॥

18.37

दुःखप्रतीकारनिमित्तम् आर्तः कृष्यादिभिः खेदम् उपैति लोकः ।अजस्रम् आगच्छति तच् च भूयो ज्ञानेन यस्याद्य कृतस् त्वयान्तः ॥ ३७ ॥

18.38

दुःखं न मे स्यात् सुखम् एव मे स्याद् इति प्रवृत्तः स्ततं हि लोकः ।न वेत्ति तच् चैव तथा यथा स्यात् प्राप्तं त्वयाद्यासुलभं यतावत्
॥ ३८ ॥

18.39

इत्य् एवमादि स्थिरबुद्धिचित्तस् तथागतेनाभिहितो हिताय ।स्तवेषु निन्दासु च निर्व्यपेक्षः कृताञ्जलिर् वाक्यम् उवाच नन्दः ॥ ३९
॥

18.40

अहो विशेषेण विषेषदर्शिंस् त्वयानुकम्पा मयि दर्षितेयम् ।यत् कामपण्के भगवन् निमग्नस् त्रातोऽस्मि संसारभयाद् अकामः ॥
४० ॥

18.41

भ्रात्रा त्वया श्रेयसि दैशिकेन पित्रा फलस्थेन ततैव मात्रा ।हतोऽभविष्यं यदि न व्यमोक्ष्यं सार्थात् परिभ्रष्ट इवाकृतार्थः ॥ ४१ ॥

18.42

शान्तस्य तुष्टस्य सुखो विवेको विज्ञाततत्त्वस्य परीक्षकस्य ।प्रहीणमानस्य च निर्मदस्य सुखं विरागत्वम् असक्तबुद्धेः ॥ ४२ ॥

18.43

अतो हि तत्त्वं परिगम्य सम्यञ् निर्धूय दोषान् अधिगम्य शान्तिम् ।स्वं नाश्रयं संप्रति चिन्तयामि न तं जनं नाप्सरसो न देवान् ॥
४३ ॥

18.44

इदं हि भुक्त्वा सुचि शामिकं सुखं न मे मनः कांषति काम्जं सुखम् ।महार्हम् अप्य् अन्नम् अदैवाहृतं दिवौकसो भुक्तवतः सुधाम् इव
॥ ४४ ॥

18.45

अहोऽन्धविज्ञाननिमीलितं जगत् पटान्तरे पश्यति नोत्तमं सुखम् ।सुधीरम् अध्यात्मसुखं व्यपास्य हि श्रमं तथा कामसुखार्थम्
ऋच्छति ॥ ४५ ॥

18.46

यथा हि रत्नाकरम् एत्य दुर्मतिर् विहाय रत्नान्य् असतो मणिन् हरेत् ।अपास्य संबोधिसुखं तहोत्तमं श्रमं व्रजेत् कामसुखोपअब्धये
॥ ४६ ॥

18.47

अहो हि सत्तेष्व् अतिमैत्रचेतसस् तथागतस्यानुजिघृक्षुता परा ।अपास्य यद् ध्यानसुखं मुने परं परस्य दुःखोपरमाय खिद्यसे ॥ ४७
॥

18.48

मया न शक्यं प्रतिकर्तुम् अद्य किं गुरौ हितैषिण्य् अनुकम्पके त्वयि ।समुद्धृतो येन भवार्णवाद् अहं महार्णवाच् चूर्णितनौर्
इवोर्मिभिः ॥ ४८ ॥

18.49

ततो मुनिस् तस्य निशम्य हेतुमत् प्रहीणसर्वास्रवसूचकं वचः ।इदं बभाषे वदताम् अनुत्तमो यद् अर्हति श्रीघन एव भाषितुम् ॥ ४९
॥

18.50

इदं कृतार्थः परमार्थवित् कृती त्वम् एव धीमन्न् अभिधातुम् अर्हसि ।अतीत्य कान्तारम् अवाप्तसाधनः सुदैशिकस्येव कृतं महावणिक् ॥ ५० ॥

18.51

अवैति बुद्धं नरदम्यसार्थिं कृती यथार्हन्न् उप्शान्तमानसः ।न दृष्टसत्योऽपि तथावबुध्यते पृथग्जनः किं बत बुद्धिमान् अपि ॥ ५१ ॥

18.52

रजस्तमोभ्यां परिमुक्तचेतसस् तवैव चेयं सदृसी कृतज्ञता ।रजःप्रकर्षेण जगत्य् अवस्थिते कृतज्ञभावो हि कृतज्ञ दुर्लभः ॥ ५२ ॥

18.53

सधर्म धर्मान्वयतो यतश्च ते मयि प्रसादोऽधिगमे च कौशलम् ।अतोऽस्ति भूयस् त्वयि मे विवक्षितं नतो हि भक्तश् च नियोगम् अर्हसि ॥ ५३ ॥

18.54

अवाप्तकार्योऽसि परां गतिं गतो न तेऽस्ति किं चित् करणीयम् अण्व् अपि ।अतःपरं सौम्य चरानुकम्पया विमोक्षयन् कृच्छ्रगतान् परान् अपि ॥ ५४ ॥

18.55

इहार्थम् एवारभते नरोऽधमो विमध्यमस् तूभयलौकिकीं क्रियाम् ।क्रियाम् अमुत्रैव फलाय मध्यमो विशिष्टधर्मा पुनर् अप्रवृत्तये ॥ ५५ ॥

18.56

इहोत्तमेभ्योऽपि मतः स तूत्तमो य उत्तमं धर्मम् अवाप्य नैष्ठिकम् ।अचिन्तयित्वात्मगतं परिश्रमं शमं परेभ्योऽप्य् उपदेष्टुम् इच्छति ॥ ५६ ॥

18.57

विहाय तस्माद् इह कार्यम् आत्मनः कुरु स्थिरात्मन् परकार्यम् अप्य् अथो ।भ्रमत्सु सत्त्वेषु तमोवृतात्मसु श्रुतप्रदीपो निशि धार्यताम् अयम् ॥ ५७ ॥

18.58

ब्रवीतु तावत् पुरि विस्मितो जनस् त्वयि स्थिते कुर्वति धर्मदेशनाः ।अहो बताश्चर्यम् इदं विमुक्तये करोति रागी यद् अयम् कथाम् इति ॥ ५८ ॥

18.59

ध्रुवं हि संश्रुत्य तव स्थिरं मनो निवृत्तनानाविषयैर् मनोरथैः ।वधूर् गृहे सापि तवानुकुर्वती करिष्यते स्त्रीषु विरागिणीः कथाः ॥ ५९ ॥

18.60

त्वयि परमधृतौ निविष्टतत्त्वे भवनगता न हि रंस्यते ध्रुवं सा ।मनसि शमदमात्मैके विविक्ते मतिर् इव कामसुखैः परीक्षकस्य ॥ ६० ॥

18.61

इत्य् अर्हतः परमकारुणिकस्य शास्तुर् मूर्ध्ना वचश् च चरणौ च समं गृहीत्वा ।स्वस्थः प्रशान्तहृदयो विनिवृत्तकार्यः पार्श्वान् मुनेः प्रतिययौ विमदः करीव ॥ ६१ ॥

18.62

भिक्षार्थं समये विवेश स पुरं दृष्टीर् जनस्याक्षिपन् लाभालाभसुखासुखादिषु समः स्वस्थेन्द्रियो निःस्पृहः ।निर्मोक्षाय चकार तत्र च कथां काले जनायार्थिने नैवोन्मार्गगतान् परान् परिभवन् नात्मानम् उत्कर्षयन् ॥ ६२ ॥

18.63

इत्य् एषा व्युपशान्तये न रतये मोक्षार्थगर्भा कृतिः श्रोतृणां ग्रहणार्थम् अन्यमनसां काव्योपचारात् कृता ।यन् मोक्षात् कृतम् अन्यद् अत्र हि मया तत् काव्यधर्मात् कृतं पातुं तिक्तम् इवौषधं मधुयुतं हृद्यं कथं स्याद् इति ॥ ६३ ॥

18.64

प्रायेणालोक्य लोकं विषयरतिपरं मो क्षात् प्रतिहतं काव्यवाजेन तत्त्वं कथितम् इह मया मोक्षः परम् इति ।तद् बुद्ध्वा शामिकं यत् तद् अवहितम् इतो ग्राह्यं न ललितं पांसुभ्यो धातुजेभ्यो नियतम् उपकरं चामीकरम् इति ॥ ६४ ॥

18.65

सौन्दरनन्दे महाकाव्य आज्ञाव्याकरणो नामाष्टादशः सर्गः ।

18.66

आर्यसुवर्णाक्षीपुत्रस्य साकेतकस्य भिक्षोर् आचार्यभदन्ताश्वघोषस्य महाकवेर् महावादिनः कृतिर् इयम् ॥